दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ हेमन्त-ऋतुः
सूर्यः दक्षिणायनम् कार्तिककृष्णाष्टमी
कार्तिक 17 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-11 ■ वर्ष-6 ■ अङ्क-08 | 1 | नवम्बर 02, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 भारतस्य प्रथमस्वदेशी-द्रुतगामी-रेलयानस्य (बुलेट-ट्रेन) प्रारूपं पूर्णम्: रेलमन्त्री अश्विनी-वैष्णवः

4 शिमलायां गर्जितवान् असमस्य मुख्यमन्त्री हेमन्त-सरमा, २०२७ तमे वर्षे भाजपा-दलस्य सर्वकारनिर्माणस्य विश्वासः कृतः

10 ब्रह्मवैवर्तपुराणस्य संक्षिप्तः कथापरिचयः

बेटी बचाओ, बेटी पढ़ाओ' इति अभियानं महिला-सशक्तीकरणस्य क्षेत्रे एकः महत्त्वपूर्णः पदक्षेपः - राष्ट्रपतिः



राष्ट्रपतिः द्रौपदी मुर्मुः प्रोक्तवती यत् 'बेटी बचाओ, बेटी पढ़ाओ' इति अभियानं महिला-सशक्तीकरणस्य दिशि महत्त्वपूर्णं सिद्धम् अभवत्। हरियाणा-राज्यस्य षष्टितमे स्थापना दिवस-समारोहे राष्ट्रपतिः एतत् उक्तवती। राष्ट्रपतिः अवदत् यत् हरियाणा-राज्यात् गीतायाः ज्ञानं सम्पूर्णदेशे प्रसारितम् । अस्य अभियानस्य शुभारम्भः पञ्चदशाधिकद्विसहस्रतमे वर्षे जनवरी मासे हरियाणाराज्यस्य पानीपत-नगरात् अभवत्। राष्ट्रपतिः अस्मिन् विषये प्रकाशितवती यत् जन्मावधौ शिशूनां लिङ्गानुपातः, यः चतुर्दशाधिकद्विसहस्रतमे वर्षे प्रति सहसं बालकेषु एकसप्तत्यधिकाष्टशतमिताः बालिकाः आसीत्, अधुना विगतवर्षस्य नवम्बर-मासं यावत् वर्धित्वा प्रायः पञ्चदशाधिकनवशतमितम् अभवत्। सा अवदत् यत् हरियाणाराज्येन विगते दशके महिला-सशक्तीकरणस्य विविधेषु यामेषु उल्लेखनीया प्रगतिः कृता अस्ति। राष्ट्रपतिः मुर्मुः अवदत् यत् हरियाणायाः पुत्र्यः अन्तार्राष्ट्रीय-क्रीडा-प्रतियोगितासु देशस्य गौरवं वर्धितवत्यः। सा उक्तवती यत् मनु भाकरः, सवीती बूरा तथा जैस्मीन लैंबोरिया इत्यादयः असंख्याः पुत्र्यः स्वकीयाभिः उल्लेखनीयाभिः उपलब्धिभिः हरियाणाराज्यं तथा च देशं गौरवान्वितं कुर्वन्ति। राष्ट्रपतिः अवदत् यत् हरियाणाराज्यस्य क्रीडकैः ओलम्पिक-क्रीडासु, पैरालम्पिक-क्रीडासु, एशियाई-क्रीडासु, राष्ट्रमण्डल-क्रीडासु तथा विश्व-चैम्पियनशिप्-प्रतियोगितासु च उत्कृष्टं साफल्यं प्राप्तम्। एतेन भारतस्य क्रीडा-इतिहासे तैः असाधारणं योगदानं प्रदत्तम्।

रेलमन्त्री अश्विनी वैष्णवः बेङ्गलूरु-मुम्बई-वन्देभारत-शयनयान-रेलयानाय हरितध्वजं प्रदर्श्य प्रेषितवान्



रेलमन्त्री अश्विनीवैष्णवः कर्णाटकस्य बेङ्गलूरुनगरे बेङ्गलूरु-मुम्बई-वन्देभारत-शयनयान रेलयानं हरितध्वजं प्रदर्श्य प्रेषितवान्। अस्मिन् अवसरे केन्द्रीयमन्त्रिणः प्रह्लादजोशी, एच्. डी. कुमारस्वामी, शोभा करन्दलाजे तथा वी. सोमण्णा अपि उपस्थिताः आसन्। बेङ्गलूरु-मुम्बई-शयनयान-वन्देभारत-रेलयानं नगरद्वयोः मध्ये स्थितां मार्गं प्रायः षोडश होरासु पूरयिष्यति। एतत् रेलयानं बेङ्गलूरुतः सोमवासरं विहाय, मुम्बईतः मङ्गलवासरं विहाय सप्ताहे षड्दिनानि प्रचलिष्यति। एतत् रेलयानम् अनन्तपुरम्, गुण्तकलम्, रायचूरम्, यादगीरम्, कलबुर्गीम्, सोलापुरम्, पुणे तथा कल्याणम् इत्येतेषु रेलस्थानकेषु विरामं यास्यति। श्रीवैष्णवः अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी बेङ्गलूरु, हैदराबाद, अमरावती तथा चेन्नईनगराणां कृते द्रुतगामिन्याः (बुलेट-ट्रेन) दक्षिणमार्गस्य अपि अनुमतिं प्रदत्तवान्। अपि च, मङ्गलुरुतः बेङ्गलूरुपर्यन्तं वन्देभारत-रेलयानस्य सञ्चालनम् आगामिषु कतिपयेषु सप्ताहेषु प्रारभ्यते।

पुरुषाणां क्रिकेट-क्रीडायाम्, न्यूजीलैण्ड-देशेन भारतं पराजितम्

पुरुषाणां क्रिकेट-क्रीडायां न्यूजीलैण्ड-दलेन हैमिल्ज-नगरे आयोजितायां विंशतिः प्रति विंशतिः अन्तार्राष्ट्रीय-शृङ्खलायाः पञ्चमान्तिमायां च क्रीडास्पर्धायां भारतं सप्तस्तोभैः पराजितम्। द्विनवत्यधिकैकशतधावनाङ्कानां लक्ष्यं प्राप्तुं न्यूजीलैण्ड्-दलेन अष्टादशसु कन्दुकक्षेपचक्रेषु त्रयाणां क्रीडकानां हानिः पुरस्सरं पञ्चनवत्यधिकैकशत धावनाङ्काः समर्जिताः।

सुभाषितम्

काले कृतं च यत् कार्यं काले एव फलप्रदम्।
काले अतिक्रान्ते कृतं कार्यं निरर्थकं भवति॥

भावार्थः- समय पर किया गया कार्य ही फलदायी होता है, समय बीत जाने पर किया गया कार्य व्यर्थ हो जाता है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११ कार्यालयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्तायां दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमलदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा

केन्द्रप्रशासनेन पेट्रोल-निर्यातस्य अतिरिक्त-उत्पाद-शुल्कम् अपसारितं, डीजल इत्यस्य विमानन-टरबाइन-इन्धनस्य च शुल्कं वर्धितम्



केन्द्रेण पेट्रोल्-निर्यात विशेषम् अतिरिक्तं उत्पादशुल्कम् अपसारितम्, अपि च डीजल तथा एविएशन् टरबाईन्-इन्धनस्य ए.टी.एफ्. इत्यस्य च निर्यातशुल्कं वर्धितम्। वित्तमन्त्रालयेन प्रसारिताधिसूचनानुसारं, संशोधितमूल्यान्तर्गतं पेट्रोल-निर्यात निर्यातशुल्कं न भविष्यति, पूर्वं प्रति-लीटर सार्धद्विरूप्यकाणि शुल्कम् आसीत्। डीज़ल् इत्यस्य निर्यातशुल्कं सार्धाष्टरूप्यकेभ्यः वर्धित्वा सार्धेकादशरूप्यकाणि प्रतिलीटर यावत् वर्धितम् अस्ति, अपि च एएफ् इत्यस्य शुल्कं पूर्व सार्द्धदशरूप्यकाणि आसीत् सम्प्रति एकादशरूप्यकाणि प्रतिलीटर यावत् वर्धितम् अस्ति। अन्ताराष्ट्रिय-अशोधिततैलस्य, परिष्कृत-पेट्रोलियम-उत्पादानां च मूल्येषु परिवर्तनस्य प्रतिक्रियारूपेण, इन्धन-निर्यात शुल्कस्य पाक्षिक-समीक्षां सर्वकारः निरन्तरं कुर्वन् अस्ति अतैव संशोधितानि मूल्यानि समागतानि।

राष्ट्रिय-सुरक्षा-परामर्शकः अजित-डोभालः अधिकृत-यात्रायै हनोई-नगरं सम्प्राप्तवान्



राष्ट्रिय-सुरक्षा-परामर्शकः अजित-डोभालः अधिकृत-यात्रायै हनोई-नगरं सम्प्राप्तवान्। अत्र सः भारत-वियतनाम-देशयोः मध्यवर्तिनः उन्नत-व्यापक-व्यूहात्मक-सहभागितायाः सुदृढीकरण-प्रयासानाम् अन्तर्गतं वियतनाम-देशस्य नेतृभिः सह वार्तां करिष्यति। इयं यात्रा उभयोः देशयोः मध्यवर्तिषु विविध-क्षेत्रेषु वर्धमान-उच्चस्तरीय-सम्पर्काणां मध्ये प्रचलति।

पूर्वं लोकसभाध्यक्षः ओम्-बिरला नवदेहल्यां द्वादशे ब्रिक्स-संसदीय-मञ्चे वियतनाम-देशस्य सांसद-सदस्यया माई डुंग थाई क्विन्ह महोदयया तथा संसदीय-मैत्री-समूहस्य सदस्यैः सह मेलनम् अकरोत्। अस्यां गोष्ठ्यां संसदीय-विनिमय-संवर्धनं, संस्थागत-सहयोगस्य दृढीकरणं, वाणिज्य-उद्योग-सूचनाप्रौद्योगिकी-तथा-कृत्रिमबुद्धि-क्षेत्रेषु सहयोगस्य नूतन-सम्भावनानां गवेषणं च अधिकृत्य चर्चिता। भारत-वियतनाम-देशाभ्यां अस्मिन् वर्षे मे मासे वियतनामस्य राष्ट्रपतेः तो लाम महोदयस्य भारत-राजकीय-यात्रायाः अवसरे स्वद्विपक्षीय-सम्बन्धेभ्यः 'उन्नत-व्यापक-व्यूहात्मक-साझेदारी' इति पदवी प्रदत्ता आसीत्।

एयर-मार्शल-मेहताब-सिंह-देसवालः भारतीय-वायुसेनायाः पूर्व-वायु-कमान-प्रमुखस्य पदभारं गृहीतवान्



एयर-मार्शल-मेहताब-सिंह-देसवालः भारतीय-वायुसेनायाः पूर्व-वायु-कमान-प्रमुखस्य पदभारं स्वीकृतवान्। एयर-मार्शल-देसवालः १९८९ तमस्य वर्षस्य जून-मासस्य १४ दिनाङ्के योद्धा-विमान-चालकत्वेन भारतीय-वायुसेनायाः उड्डयन-शाखायां नियुक्तः जातः। रक्षा-मन्त्रालयस्य अनुसारं, तस्मै विविधेषु युद्धविमानेषु द्वात्रिंशत्-शत-होराभ्यः (३२०० घण्टाभ्यः) अधिकानाम् उड्डयनानाम् अनुभवः अस्ति। सः प्रहारक-विमानानाम् आकाश-रक्षा-भूमिकानां च विशेषज्ञः अस्ति। सः एकः योग्यः चालक-प्रहारक-प्रशिक्षकः (पायलट अटैक इंस्ट्रक्टर) अपि वर्तते। विशिष्ट-सेवाभ्यः सः 'अति-विशिष्ट-सेवा-पदकेन' 'वायुसेना-पदकेन' च अलङ्कृतः अभवत्।

भारतस्य प्रथमस्वदेशी-द्रुतगामी-रेलयानस्य (बुलेट-ट्रेन) प्रारूपं पूर्णम्: रेलमन्त्री अश्विनी-वैष्णवः



रेलमन्त्री अश्विनी-वैष्णवः न्यवेदयत् यत् भारतस्य प्रथमस्य स्वदेशी-द्रुतगामी-रेलयानस्य प्रारूपं (डिजाइन) सिद्धं जातं, तस्य निर्माणकार्यं च तीव्रगत्या प्रचलति। श्रीवैष्णवः अद्य बेङ्गळूरु-नगरे बीईएमएल-संस्थायां उच्चगति-रेलयानस्य प्रतिरूपं विविधाः प्रणालीः च निरीक्ष्य एतां सूचनां दत्तवान्। सः असूचयत् यत् रेलयानस्य प्रथमं मूलप्रारूपं (प्रोटोटाइप) आगामिनः वर्षस्य आरम्भे सज्जं भवितुम् अर्हति। मुम्बई-अहमदाबाद-उच्चगति-रेल-संमार्गस्य तथा भविष्यस्य अन्य-संमार्गेभ्यः निर्मीयमाणं स्वदेशी-उच्चगति-रेलयानं 'बी-२८' एकं महत्त्वपूर्णं सोपानं प्राप्तवत्। रेलमन्त्री विश्वासं प्राकटयत् यत् बीईएमएल-नेतृत्वेन विकसितं समूहेन इदं बी-२८ रेलयानं सर्वान् अन्ताराष्ट्रिय-मानकान् पूरयिष्यति।

अल्पसङ्ख्यक-कार्यमन्त्री किरेन-रिजिजूः भूटाने १०८ स्तूपानां प्रतिष्ठा-समारोहे भारतस्य प्रतिनिधित्वम् अकरोत्



अल्पसङ्ख्यक-कार्यमन्त्री किरेन-रिजिजूः भूटान-नरेशस्य जिग्मे-खेसर-नामग्याल-वांगचुकस्य नेतृत्वे गेलेफू-माइंडफुलनेस-नगरे १०८ स्तूपानां प्रतिष्ठा-महोत्सवे भारतस्य प्रतिनिधित्वं विहितवान्। अल्पसङ्ख्यक-कार्य-मन्त्रालयेन उक्तं यत् श्रीरिजिजू-महोदयस्य सहभागिता भारत-भूटानयोः सहयोगात्मक-आध्यात्मिक-सांस्कृतिक-परम्परां तथा च तयोः पुरातनीं मैत्रीं प्रदर्शयति। १०८ स्तूपानाम् इयं परियोजना भूटान-नरेशस्य सङ्कल्पः आसीत्, तेनैव अस्य निर्माणकार्यस्य नेतृत्वं कृतम्। असम-सीमायाः समीपे गेलेफू-माइंडफुलनेस-नगरे एई-नद्याः तीरे ११.७ किलोमीटर्-परिमिते क्षेत्रे एकस्मिन्नेव दिने सहस्रशः स्वयंसेवकैः १०८ स्तूपाः निर्मिताः। प्रत्येकस्य स्तूपस्य औन्नत्यं १५ मीटर्-परिमितं, तेषां परस्परं दूरता च १०८ मीटर्-परिमिता अस्ति।

वर्धा-मण्डले निर्मीयमाणं बहुविध-परिवहन-सञ्चार-उद्यानम् आजीविकायाः नूतनावसरान् उद्घाटयिष्यतिः केन्द्रीयमन्त्री नितिन-गडकरी



केन्द्रीय-मार्ग-परिवहन-राजमार्ग-मन्त्री नितिन-गडकरी अवदत् यत् वर्धा-मण्डलस्य सिन्दी-रेल्वे-स्थाने निर्मीयमाणं बहुविध-परिवहन-उद्यानं विदर्भ-क्षेत्रे अन्ताराष्ट्रिय-व्यापारस्य आजीविकायाः च नवान् अवसरान् उद्घाटयिष्यति। अनया सुविधया स्थानीयानि कृषि-औद्योगिक-उत्पादनानि जवाहरलाल-नेहरू-पोताश्रय-माध्यमेन सुलभतया विदेशीय-विपणिषु प्रापयितुं शक्यन्ते।

केन्द्रीयमन्त्री गडकरी सिन्दी-रेल्वे-स्थाने अस्याः परियोजनायाः आधारशिला-समारोहं सम्बोधयति स्म। सार्ध-शत-एकड् (१५० एकड्) परिमिते भूभागे निर्मीयमाणस्य अस्य पार्कस्य विकासः सिन्दी-रेल्वे-स्थानकस्य समीपे क्रियते। अस्य निर्माणं भारतीय-राष्ट्रिय-राजमार्ग-प्राधिकरणस्य विशेष-घटकः 'नेशनल हाईवे लॉजिस्टिक्स मैनेजमेंट लिमिटेड्' जवाहरलाल-नेहरू-पोर्ट-प्राधिकरणस्य सहयोगेन करोति। परियोजनायाः निर्माणकार्यम् 'अमारा ट्रांज़ सॉल्यूशन' इति संस्थायै समर्पितम्।

वायुसेनाध्यक्षः आशुतोष-दीक्षितः स्वदेशी-क्षमतानां तीव्र-विस्तारार्थं बलं दत्तवान्



एयर-चीफ-मार्शल-आशुतोष-दीक्षितः भारतीय-वायुसेनायाः एकोनत्रिंशत्तमस्य (२९) प्रमुखस्य रूपेण पदभारं स्वीकृतवान्। वायुसेनाध्यक्षः स्वकार्यकालस्य आरम्भं राष्ट्रिय-समर-स्मारके देशसेवायै सर्वोच्च-बलिदानं दत्तवद्भ्यः वीरेभ्यः योधेभ्यः श्रद्धाञ्जलिं समर्प्य अकरोत्। तदनन्तरं नवदेहलीस्थे वायुसेना-स्थानके तस्मै सम्मान-रक्षिभिः अभिनन्दनं (गार्ड ऑफ ऑनर) प्रदत्तम्।

वायुसेनाध्यक्षेण उक्तं यत् अद्य वायुसेनायाः प्रत्येकं दलं (स्क्वाड्रन), सर्वाः आकाश-रक्षा-इकाइयः, सर्वे च वायुसैनिकाः कस्मिन्नपि समये प्रत्युत्तर-कार्याचरणाय सज्जाः भवेयुः। सः अवदत् यत् वायुसेनायाः सर्वासां शाखानाम् अभियानार्थं पूर्णतया सज्जता-स्थापनं युद्ध-क्षमतायाः च स्वीकृत-स्तरं यावत् पुनरुद्धारः तस्य सर्वोच्चा प्राथमिकता वर्तते।

प्रधानमन्त्री मोदी अद्य भारत-मण्डपमे 'भारत-नवीकरणीय-ऊर्जा-शिखरसम्मेलनस्य' उद्घाटनं करिष्यति



प्रधानमन्त्री नरेन्द्र-मोदी अद्य नवदेहल्याः भारत-मण्डपमे चतुर्दिवसीयस्य 'भारत-नवीकरणीय-ऊर्जा-शिखरसम्मेलनस्य' तथा 'प्रदर्शिन्याः' (एक्स्पो २०२६) उद्घाटनं विधास्यति। नवीन-नवीकरणीय-ऊर्जा-मन्त्रालयेन आयोजितस्य अस्य सम्मेलनस्य मुख्यविषयः 'निवेशः, नवोन्मेषः, प्रेरणा च' इति अस्ति। अस्मिन् सम्मेलने त्रिंशदधिक-शत (१३०) देशेभ्यः प्रतिनिधीनां समागमः सम्भाव्यते, येषु चत्वारिंशदधिक-मन्त्रिणः अपि अन्तर्भूताः सन्ति। नीति-निर्मातारः, निवेशकाः, वित्तीय-संस्थानानि, उद्योग-जगतः प्रमुखाः च प्रतिनिधीयमानाः अस्मिन् सम्मेलने स्वच्छ-ऊर्जायां निवेशं, प्राविधिक-नवोन्मेषं, तथा अन्ताराष्ट्रिय-सहभागितां च अधिकृत्य मन्त्रणां करिष्यन्ति। अस्मिन् आयोजने ऑस्ट्रेलिया, डेनमार्क, यूरोपीय-सङ्घः, फ्रान्स, जर्मनी, नीदरलैण्ड, नॉर्वे, स्वीडन तथा ब्रिटेन-देशाः भागीदार-राष्ट्ररूपेण सम्मिलिताः भविष्यन्ति। त्रयोदश (१३) राज्यानि केन्द्रशासित-प्रदेशाः च स्वकीयां नवीकरणीय-ऊर्जा-क्षमतां, निवेशावसरान्, निर्माणक्षमतां च प्रदर्शयिष्यन्ति। अनेन सम्मेलनेन सह अन्ताराष्ट्रिय-सौर-गठबन्धनस्य नवमी सभा तथा चतुर्थं हरित-हाइड्रोजन-सम्मेलनम् अपि अनुष्ठास्यते। अत्र मन्त्रिमण्डलीयाः चर्चाः, मुख्यकार्यकारी-अधिकारिणां वर्तुल-गोष्ठी, राज्यानां विशेष-सत्राणि च भविष्यन्ति। सहैव आयोजितायां प्रदर्शिन्यां ४०० तः अधिकाः प्रदर्शकाः सौर-पवन-ऊर्जा-हरित-हाइड्रोजन-ऊर्जा-सञ्चयनानाम् आधुनिक-प्रविधीन्, स्वदेशी-उत्पादनक्षमतां, स्वच्छ-ऊर्जा-समाधानानि च प्रदर्शयिष्यन्ति।

अस्मिन् वर्षे अक्टूबर-मासे देशस्य सकल-वस्तु-सेवा-कर-संग्रहे गतवर्षस्य तुलनायाम् प्रायः त्रयोविंशतिः प्रतिशतं वृद्धिः अभवत्



देशस्य समग्र-वस्तु-सेवा-करस्य (जी.एस्.टी.) इत्यस्य सङ्ग्रहः अस्मिन् वर्षे अक्टूबर-मासे प्रतिवर्षं प्रायः त्रयोविंशतिः प्रतिशतं वृद्धिं प्राप्य एकत्रिंशसहस्राधिक द्विलक्ष-कोटिरूप्यकाणि यावत् अभवत्, यत् आर्थिक क्रियाकलापैः, आयातैः कर-राजस्वस्य तीव्रवृद्ध्या च प्रेरितः आसीत्। गतदिवसे प्रकाशितस्य अस्थायी सर्वकारीय-दत्तांशस्य अनुसारं, देशीयविक्रयणात् सकल-जी.एस.टी. राजस्वः अक्टूबर-मासे प्रतिवर्षं अष्ट-दशांशोत्तर-पञ्चदश-प्रतिशतं वृद्धिं प्राप्य नव-पञ्च-दशांशोत्तरैक लक्ष-कोटिरूप्यकाणि अभवत्। आयातेन प्राप्तः राजस्वः द्वि-दशांशोत्तर-द्विचत्वारिंशत् प्रतिशतं वृद्धिं प्राप्य प्रायः सपाद-द्वि-सप्तति-सहस्र-कोटिरूप्यकाणि अभवत्। समग्र-जी.एस.टी. राजस्वसङ्ग्रहणे केन्द्रीय-जी.एस.टी. सञ्चयः पञ्चत्रिंशदधिक-नवशताधिक-द्विचत्वारिंशत्-सहस्र-कोटिरूप्यकाणि, राज्य-जी.एस्.टी. चत्वारिंशदधिक-त्रिशतोत्तर-एकपञ्चाशत्- सहस्र-कोटिरूप्यकाणि संग्रहीतानि

कर्मचारी भविष्यनिधि-सङ्घटनेन नवदेहल्यां स्वस्य चतुःसप्ततितमं संस्थापनादिवसम् आचरितम्



ई.पी.एफ.ओ. इति कर्मचारी भविष्यनिधि-सङ्घटनेन नवदेहल्यां स्वस्य चतुःसप्ततितमं संस्थापनादिवसम् आचरितम्। द्विपञ्चाशदधिक-ऊनविंशतिशततमे वर्षे संस्थापनादारभ्य वैधानिक-भविष्यनिधि-संस्थातः भारतस्य अग्रगण्य-सामाजिक-सुरक्षा-संस्थासु अन्यतमा इति ई.पी.एफ.ओ. इत्यस्य यात्रा अस्मिन् अवसरे लक्षिता अभवत्। श्रम-जीविका-मन्त्री मनसुख माण्डवीयः अस्य कार्यक्रमस्य अध्यक्षतां कृतवान्, यस्मिन् श्रममन्त्रालयस्य सचिवः चन्द्रभूषणकुमारः, केन्द्रीय-भविष्यनिधि युक्तः रमेशः कृष्णमूर्तिः, कर्मकराः, नियोक्तारः, अन्ये च सहभागिनः अपि उपस्थिताः आसन् । सभाम् सम्बोधयन्, श्री. माण्डवीयः अधोरेखितवान् यत् चतुःसप्तति वर्षाणां यात्रायां, ई.पी.एफ.ओ., देशस्य कार्यबलस्य कृते विश्वसनीयसंस्थारूपेण उद्भूतम् अस्ति ।

अखिलभारतीयप्राच्यविद्यासम्मेलने पतंजलि- विश्वविद्यालये हरिद्वारनगरे हिमाचली- 'सिड्डू' नामकस्य खाद्यपदार्थस्य महिमा, विदेशी- अतिथयः अपि मुदिताः



हिमसंस्कृतवार्ताः- डॉ पद्मनाभः, हरिद्वारम्

हिमाचलप्रदेशस्य पारम्परिकस्य व्यञ्जनस्य 'सिड्डू' इत्यस्य स्वादः इदानीं देशस्य सीमाम् उल्लङ्घ्य बहिःस्थितानाम् अतिथीनाम् अपि समीपं गच्छति। हरिद्वारस्थिते पतंजलि-विश्वविद्यालये आयोजिते 'अखिलभारतीय- प्राच्यविद्यासम्मेलने-२०२६' मण्डी-मण्डलस्य 'सिड्डू' जनानाम् आकर्षणस्य केन्द्रम् अभवत्। मण्डीमण्डलस्य 'अम्बिका' स्वयंसेवासमूहानां महिलाः स्वकीय-आपणेन हिमाचलप्रदेशस्य भोजनपरम्परायाः स्थानीयसंस्कृतेः च स्वरूपं प्रस्तुतवत्यः। अस्मिन् सम्मेलने देशस्य विभिन्नराज्येभ्यः आगतेषु प्रतिभागिषु विदेशी-अतिथयः अपि हिमाचली- 'सिड्डू' व्यञ्जनस्य आस्वादनम् अकुर्वन्।

'अम्बिका'-स्वयंसेवासमूहानां महिलाः विशेषरूपेण हिमाचलस्य प्रसिद्धं पारम्परिकं पकवानं 'सिड्डू' इत्येतद् गृहीत्वा हरिद्वारं प्राप्ताः आसन्। सम्मेलने तासाम् आपणे जनानाम् उत्तमः रुचिः दृष्टा। विभिन्नराज्येभ्यः आगताः प्रतिभागिनः विदेशी- अतिथयः च 'सिड्डू' आस्वाद्य हिमाचली- अशनस्य विषये अपि जानकारीम् प्राप्तवन्तः।

समूहस्य सञ्चालिका अञ्जुशर्मा अवदत् यत् एतादृशानि आयोजनानि स्वयंसेवासमूहैः सह संलग्नानां महिलानां कृते स्वस्य कौशलं स्थानीयोत्पादनानि च बृहत्-मञ्चे स्थापयितुम् अवसरं प्रप्रकटितवती। अनेन पारम्परिकव्यञ्जनानां नवीनपरिचयः भवति, महिलानां स्वरोजगारः च प्रोत्साहनं प्राप्नोति। सा अस्य अवसरस्य कृते सम्मेलनस्य आयोजकानाम् मण्डी-नगरनिगमस्य च आभारं पतंजलि-अनुसन्धान-प्रतिष्ठानस्य वैज्ञानिकः डा. अश्विनी ठाकुरः अवदत् यत् सम्मेलने प्रकाशकैः सह देशस्य विभिन्नराज्यानां स्वयंसेवासमूहानां महिलाः अपि भागम् अगृहणन्। अस्मिन् अवसरे विभिन्नक्षेत्राणां संस्कृतिः, पारम्परिकोत्पादनानि, स्थानीयव्यञ्जनानि च प्रदर्शितानि। सः अवदत् यत् प्रायः त्रिंशत्-वर्षाणां दीर्घकालानन्तरं हरिद्वारनगरे अखिलभारतीयप्राच्यविद्यासम्मेलनस्य आयोजनं क्रियते। अस्य सम्मेलनस्य समापनम् १ नवम्बरदिनाङ्के भविष्यति।'अम्बिका' स्वयंसेवासमूहस्य सहभागिता मण्डीमण्डलस्य पारम्परिकं 'सिड्डू'-व्यञ्जनं अन्यराज्येभ्यः जनानां विदेशी-अतिथीनां च कृते प्रापयितुम् अवसरं प्रदत्तवती। एतादृशानां आयोजनानां माध्यमेन स्थानीयखानपानस्य, सांस्कृतिकविरासतस्य, स्वयंसेवासमूहानां च उत्पादनानां व्यापकः परिचयः प्राप्यते। अनेन सह ग्रामीणमहिलानां कौशलस्य स्वरोजगारेण आजीविकया च सह संयोजनमपि साहाय्यं भवति।

शिमलायां गर्जितवान् असमस्य मुख्यमन्त्री हेमन्त-सरमा,
२०२७ तमे वर्षे भाजपा-दलस्य सर्वकारनिर्माणस्य विश्वासः कृतः

हिमसंस्कृतवार्ता — शिमला।

काङ्ग्रेस-दलस्य देहली-रैली-प्रदर्शनस्य प्रत्युत्तरे रविवासरे भाजपा-दलेन शिमलायां पदयात्रां विधाय काङ्ग्रेस-दलं, राहुल-गान्धिनं, प्रदेशसर्वकारं चाभिलक्ष्य तीक्ष्णाः आघाताः विहिताः। 'लोकतन्त्रं रक्षत, अराजकताम् अपसारयत' इति पदयात्रां सम्बोधयन् असमस्य मुख्यमन्त्री हेमन्त-विश्व-सरमा विश्वासं कृतवान् यत् हिमाचलात् काङ्ग्रेस-सर्वकारस्य निर्गमनं निश्चितं वर्तते तथा च २०२७ तमस्य वर्षस्य विधानसभा-निर्वाचनेषु भाजपा-दलं प्रचण्डबहुमतेन सह सर्वकारं रचयिष्यति। सः प्रावोचत् यत् शिमलायां समागतः जनसमर्थनस्य प्रवाहः स्पष्टं सङ्केतं प्रयच्छति यत् आगामिनि वर्षे अस्मिन्नेव काले हिमाचलप्रदेशे भारतीयजनतापक्षस्य मुख्यमन्त्री भविष्यति। इतः पूर्वं भाजपा-दलस्य 'लोकतन्त्रं रक्षत, अराजकताम् अपसारयत' इति पदयात्रा शिमलायाः पुरातन-स्थानिक-बस-स्थानकस्थस्य गुरुद्वारा-साहिब-यानस्थानात् (पार्किङ्ग) आरब्धा अभवत्। तदनन्तरं सा 'विक्ट्री-टनल'-मार्गेण विधानसभा-मार्गेण च सञ्चरन्ती 'चौड़ा-मैदान'-स्थलं प्राप्ता, यत्र विशाला जनसभा आयोजिता। पदयात्रायाम् असमस्य मुख्यमन्त्री हेमन्त-विश्व-सरमा, भाजपा-प्रदेशाध्यक्षः डॉ. राजीव-बिन्दलः, पूर्वमुख्यमन्त्री प्रतिपक्षनेता च जयराम-ठाकुरः, पूर्वकेन्द्रीयमन्त्री सांसदश्च अनुरागसिंह-ठाकुरः, सांसदः सुरेश-कश्यपः, राज्यसभासांसदः डॉ. सिकन्दर-कुमारः, प्रदेशसङ्गठनमहामन्त्री सिद्धार्थन-महोदयश्च सहिताः भाजपा-दलस्य ज्येष्ठाः नेतारः, पदाधिकारिणः, विपुलायां संख्यायां कार्यकर्तारश्च उपस्थिताः आसन्। सभायाः अन्तराले भाजपा-कार्यकर्तृभिः 'भारतमाता की जय' तथा च प्रधानमन्त्रिणः नरेन्द्रमोदिनः समर्थनार्थं जयघोषाः कृताः। मुख्यमन्त्री शर्मा देवभूमिं हिमाचलप्रदेशं प्रणम्य अवदत् यत् सः मातुः कामाख्यायाः धरण्याः असमराज्यतः देवी-देवतानां पावनभूमिं हिमाचलं सम्प्राप्तः अस्ति। सः भाजपा-कार्यकर्तृभ्यः आह्वानम् अकरोत् यत् ते प्रदेशे राजनैतिकपरिवर्तनाय अधुना एव सन्नद्धाः भवन्तु। हेमन्त-विश्व-सरमा प्रदेशस्य काङ्ग्रेस-सर्वकारोपरि अपि भृशं प्रहारम् अकरोत्। सः प्रावोचत् यत् मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः इदं स्पष्टीकुर्यात् यत् यस्याः ईवीएम (EVM)-प्रणाल्याः माध्यमेन हिमाचलप्रदेशे निर्वाचनानि अभवन् काङ्ग्रेस-दलं च सत्ताम् आप्नोत्, तस्याः एव मतदानप्रणाल्याः विरोधे समग्रः सर्वकारः देहल्यां किमर्थं प्रदर्शनं कुर्वन् अस्ति। सः अवदत् यत् यदि काङ्ग्रेस-दलस्य ईवीएम-यन्त्रेषु विश्वासः नास्ति, तर्हि मुख्यमन्त्री सुक्खूः कथयतु यत् सः तस्याः एव निर्वाचनप्रणाल्याः प्राप्तादेशस्य (जनादेशस्य) आधारेण मुख्यमन्त्री किमर्थं तिष्ठति।

तेनोक्तं यत् काङ्ग्रेस-दलं कर्णाटके, तेलङ्गानायां, हिमाचलप्रदेशे च निर्वाचनानि जयति तदा ईवीएम-यन्त्रेषु प्रश्नान् न उत्थापयति, किन्तु भाजपा-दलस्य विजयसमनन्तरमेव निर्वाचन-आयोगोपरि मतदानप्रणाल्याम् उपरि चाक्षेपान् आरोपयितुं प्रारभते। सः राहुल-गान्धिनं प्रति आह्वानं कुर्वन् अवदत् यत् यदि तस्य निर्वाचनप्रणाल्यां तावती



आपत्तिः अस्ति, तर्हि सः स्वस्य रायबरेली-लोकसभा-स्थानस्य विजये तथा च लोकसभायां प्रतिपक्षनेतुः पदस्य सन्दर्भेऽपि स्वकीयं दृष्टिकोणं स्पष्टीकुर्यात्। सः प्रावोचत् यत् काङ्ग्रेस-दलस्य राजनीतौ तस्यामेव निर्वाचनप्रणाल्यां स्वविजये सत्यतायाः भाजपा-दलस्य विजये चासत्यतायाः कथनस्य द्विविधः मापदण्डः (द्विमुखी नीतिः) दृश्यते।

एसआईआर (SIR)-विषये काङ्ग्रेस-दलस्य विरोधः, अनाधिकृत-प्रवेशकान् अधिकृत्य उत्थापिताः प्रश्नाः

असमस्य मुख्यमन्त्रिणा विशेष-गहन-पुनरीक्षणस्य (SIR) समर्थनं कुर्वता प्रतिपादितं यत् मतदातासूचीनां शुद्धिः लोकतन्त्रस्य सुदृढीकरणार्थम् आवश्यकी वर्तते। सः आरोपम् अकरोत् यत् काङ्ग्रेस-दलं मतदातासूच्याः पुनरीक्षणविषये भ्रमप्रसारणस्य प्रयासं करोति। शर्मा-महोदयः अवदत् यत् योग्यानां भारतीयनागरिकाणां मतदानाधिकाराः सुरक्षिताः भवेयुः, किन्तु अयोग्यानां नामाभिज्ञानस्य नियमानुसारं च कार्यप्रणाल्याः विरोधः न कर्त्तव्यः। सः राहुल-गान्धिनं प्रापृच्छत् यत् यदा काङ्ग्रेस-दलस्य शीर्षनेतॄणां नामानि मतदातासूचीषु विद्यन्ते, तदा ते केनाधारेण समग्रां निर्वाचनप्रक्रियां संशयग्रस्तां कथयन्ति। सः काङ्ग्रेस-दलम् अधिकृत्य बाङ्ग्लादेशस्य नेपालस्य च राजनैतिकघटनानाम् उदाहरणं दत्त्वा देशे अस्थिरतायाः वातावरणनिर्माणस्य प्रयासस्य आरोपम् अकरोत्।

१९८४ तमस्य वर्षस्य सिक्खविरोधि-उपप्लवेषु राहुल-गान्धितः क्षमायाचनायाः अभ्यर्थना

मुख्यमन्त्री सरमा १ नवम्बर्-दिनाङ्कस्य उल्लेखं कुर्वन् १९८४ तमस्य वर्षस्य सिक्खविरोधि-उपप्लवानां विषयम् अपि उत्थापितवान्। सः अवदत् यत् तत्कालीन-प्रधानमन्त्रिण्याः इन्दिरागान्ध्याः वधानन्तरं देहल्या सहैव देशस्य विविधभागेषु सिक्खसमुदायस्य विरुद्धं भयङ्करा हिंसा सञ्जाता। सः देहल्यां सहस्रशः सिक्खानां संहारस्य उल्लेखं कुर्वन् काङ्ग्रेस-नेतृत्वस्य ऐतिहासिकोत्तरदायित्वम् अधिकृत्य प्रश्नान् प्रास्तौत्। सरमा-महोदयः राहुल-गान्धितः न्यरूपयत् यत् सः १ नवम्बर् दिने देहल्यां राजनैतिकरैली-समारम्भात् प्राक् १९८४ तमस्य वर्षस्य सिक्खविरोधि-उपप्लवेभ्यः सार्वजनिकरूपेण क्षमां याचेत।

हिमाचले पञ्चलक्षरूप्यकाणां वृत्ति-संयोगस्य प्रतिज्ञा अपूर्णा

हेमन्त-विश्व-शर्मा असम-हिमाचलप्रदेशयोः सर्वकारयोः कार्यशैलीं तुलयन् अवदत् यद् असमराज्ये भाजपा-सर्वकारेण एकलक्षं सर्वकारीयवृत्तीनां प्रतिज्ञा कृता आसीत्, तेनानुसारेण प्रायः १.०७ लक्षयुवभ्यः वृत्ति-संयोगाः (रोजगाराः) प्रदत्ताः। सः प्रावोचत् यत् हिमाचले काङ्ग्रेस-दलेन पञ्चलक्षवृत्तिसंयोगानां प्रतिज्ञा विहिता आसीत्, किन्तु प्रदेशस्य युवानः अद्यापि वृत्तेः अवसराणाम् प्रतीक्षमाणाः सन्ति। सः अपृच्छत् यत् हिमाचले काङ्ग्रेस-दलेन पञ्चलक्षवृत्तिसंयोगानां प्रतिज्ञा कृता आसीत्, अधुना सर्वकारः कथयतु यत् कति युवभ्यः वृत्तिः समुपलब्धा जाता।

मतपत्रैरपि पराजयं प्राप्नोति काङ्ग्रेस-दलम्, तर्हि मतचौर्यस्य कोलाहलः किमर्थम्?

असमस्य मुख्यमन्त्री प्रावोचत् यत् काङ्ग्रेस-दलम् ईवीएम-यन्त्रोपरि दोषारोपणं करोति, यदा तु मतपत्रैः (बैलेट-पेपर) आयोजितेषु निर्वाचनेष्वपि तस्य राजनैतिकपराजयः एव भवति। सः हिमाचलस्य जिला-परिषद्-निर्वाचनानां तथा च विविधानां राज्यानां विधानपरिषद्-निर्वाचनानाम् उल्लेखं कुर्वन् विश्वासम् अकरोत् यत् भाजपा-दलेन मतपत्राणां माध्यमेनापि महत्त्वपूर्णाः निर्वाचनसफलताः सम्प्राप्ताः। सः अवदत् यत् काङ्ग्रेस-दलेन स्वपराजयस्य कृते मतदानप्रणाल्याः दूषणस्य स्थाने जनसामान्येन सह कृतानां प्रतिज्ञानां स्वकीयस्य च सङ्घटनात्मकप्रदर्शनस्य समीक्षा करणीया।

आभारतात् समागतानां कार्यकर्तृणां समुपस्थितौ संस्कृतभारत्या अखिलभारतीया गोष्ठी हिमाचलप्रदेशस्य नुरपुरे सुसम्पन्ना





हिमसंस्कृतवार्ताः- नूरपुरम् (हिमाचलप्रदेशः), ३१ अक्तूबर, १ नवम्बर २०२६। हिमाचलप्रदेशस्य नूरपुरस्थे मलकवालस्थिते वी.वी.एम. नर्सिङ्ग-इंस्टीट्यूट नामके स्थाने संस्कृतभारत्या आयोजितायाः अखिलभारतीयगोष्ठ्याः भव्योद्घाटन-समारोहः ३१ दिनाङ्के अत्यन्तोत्साहपूर्णे गरिमामये च वातावरणे सम्पन्नः। अस्याः गोष्ठ्याः उद्घाटनं हिमाचलप्रदेशस्य महामहिम्ना राज्यपालेन माननीयेन कविन्दरगुप्तामहोदयेन, हिमाचलप्रदेश-केन्द्रीय- विश्वविद्यालयस्य कुलपतिना प्रो. सतप्रकाशबंसलमहोदयेन, अखिलभारतीयाध्यक्षेण प्रो. रमेशकुमारपाण्डेयमहोदयेन, अखिलभारतीय-सङ्घटनमन्त्रिणा मान्य- सत्यनारायणभट्टमहोदयेन संयुक्तरूपेण दीपप्रज्वलनेन कृतम्।कार्यक्रमे राष्ट्रगीतस्य राष्ट्रगानस्य च सामूहिकगायनम् अभवत्। तदनन्तरं संस्कृतभारत्याः ध्येयमन्त्रेण सम्पूर्णं वातावरणं संस्कृतमयम् आध्यात्मिकभावनया च परिपूर्णम् अभवत्। स्वागतसमितेः अध्यक्षः माननीयः राकेशपठानिया-महोदयः, संस्कृतभारत्याः हिमाचलप्रदेशप्रान्ताध्यक्षः डॉ. राजेशशर्ममहोदयः समागतानां विशिष्टातिथीनां परिचयं कारयित्वा तेषां हार्दिकं स्वागतं कृतवन्तौ। स्वकीयाध्यक्षीयभाषणे कुलपतिः प्रो. सतप्रकाशबंसलमहोदयः भारतीयज्ञानपरम्परायाः शिक्षायाम् अनुसन्धानक्षेत्रे च महत्त्वं प्रतिपादितवान्। मुख्यातिथिरूपेण सम्बोधयन् महामहिमः राज्यपालः कविन्दरगुप्तामहोदयः संस्कृतभारत्याः प्रयासस्य प्रशंसां कुर्वन् समाजस्य राष्ट्रस्य च निर्माणे एतादृशानां बौद्धिकविमर्शानां महत्त्वपूर्ण-भूमिकां निरूपितवान्। अस्याम् अखिलभारतीयगोष्ठ्यां द्वयोः दिवसयोः विभिन्नेषु सत्रेषु विविधाः विषयाधारिताः गोष्ठ्याः, विचारविमर्शाः तथा सङ्घटनात्मकचर्चाः कृताः।अखिलभारतीयगोष्ठ्याः समापनसत्रं १ नवम्बर २०२६ दिनाङ्के सायं ४:३० वादनतः ६:०० वादनपर्यन्तम् अत्यन्तं गरिमामये अनुशासिते च वातावरणे सम्पन्नम्। सत्रेऽस्मिन् संस्कृतभारत्याः अखिलभारतीयाध्यक्षः प्रो. रमेशकुमारपाण्डेय-महोदयः, अखिलभारतीयमहामन्त्री सत्यनारायण-भट्टमहोदयः, अखिलभारतीयसङ्घटनमन्त्री जयप्रकाशगौतममहोदयः च विशेषरूपेण उपस्थिताः आसन्। कार्यक्रमस्य सञ्चालनम् उत्तर-पश्चिमक्षेत्रेण राजस्थानेन कृतम्। सत्रस्य सञ्चालनं डॉ. मधुसूदनमहोदयेन कृतम्। कार्यक्रमस्य शुभारम्भः दीपप्रज्ज्वलनेन अभवत्। अनन्तरं डॉ. शिवचरणशर्ममहोदयेन मङ्गलाचरणं प्रस्तुतः, डॉ. कमलकिशोरचोटियामहोदयेन च संस्कृतभारत्याः ध्येयमन्त्रः प्रस्तुतः। डॉ. मधुसूदनमहोदयः उपस्थितानाम् अतिथीनां परिचयं कारयित्वा स्वागतं कृतवान्। सत्रे अखिलभारतीयमहामन्त्री सत्यनारायणभट्टमहोदयः सङ्घटनस्य वार्षिक-प्रतिवेदनं प्रस्तुतवान्। तेन सङ्घटनस्य विविधाः गतिविधयः, कार्ययोजनाः, उपलब्धयः, संस्कृतभाषायाः प्रचारप्रसाराय सञ्चालितानां च कार्यक्रमाणां विस्तृतं विवरणं प्रदत्तम्। अखिलभारतीयसङ्घटनमन्त्री जयप्रकाशगौतम-महोदयः कार्यकर्तृणां जिज्ञासानां समाधानं कुर्वन् सङ्घटनस्य कार्यपद्धतेः, दायित्वानां, भाविकार्यदिशायाः च विषये महत्त्वपूर्णं मार्गदर्शनम् अकरोत्।अस्मिन्नवसरे डॉ. सवाईसिंहमहोदयेन वैयक्तिकगीतं प्रस्तुतम्। स्वकीयसम्बोधने जयप्रकाशगौतममहोदयः सङ्घटनस्य वैचारिकनिष्ठायाः, अनुशासनस्य, समर्पणभावनायाः, सामूहिकदायित्वस्य च महत्त्वं विशदीकृतवान्।समापनावसरे सर्वैः उपस्थितैः कार्यकर्तृभिः संस्कृतभाषायाः प्रचारप्रसारं जनसामान्यपर्यन्तं नेतुं तथा सङ्घटनस्य उद्देश्यानां पूर्तये स्वकीयदायित्वानि निष्ठया निर्वोढुं सामूहिकः सङ्कल्पः स्वीकृतः। अन्ते तनुसिंहराठौडमहोदयेन कल्याणमन्त्रस्य पाठेन कार्यक्रमस्य विधिवत् समापनं कृतम्। हिमाचलप्रदेशः अखिलभारतीयगोष्ठ्यां संस्कृतभारत्याः हिमाचलप्रदेशप्रान्तस्य नूतनदायित्वानां घोषणा कृता। अस्यां घोषणायां प्रान्तस्य विभिन्नेषु पदेषु योग्याः कार्यकर्तारः नियुक्ताः। घोषणानुसारम् आचार्यःयोगेन्द्रकुमारधामामहोदयः प्रान्तोपाध्यक्षयः, डॉ. मुकेशकुमारमहोदयः प्रान्तमन्त्री, आचार्यः ओङ्कारचन्दमहोदयः प्रान्तप्रशिक्षणप्रमुख च नियुक्ताः। अस्मिन्नेव क्रमे नरेन्द्रकुमारमहोदयः उत्तरक्षेत्रसङ्घटनमन्त्रिणा दायित्वेन सह अखिलभारतीय सहसम्पर्कप्रमुखरूपेणापि कार्यं करिष्यति। तथैव डॉ. सन्नीकुमारमहोदयः प्रान्तमहाविद्यालय-कार्यप्रमुखः, डॉ.राजेशशर्मम-होदयः सोलनविभागसंयोजकः, नमनमहोदयः काङ्गडाविभागस्य सङ्घटनमन्त्री, कर्णमहोदयः शिमलाविभागस्य च सङ्घटनमन्त्री नियुक्ताः। एतेषां नूतनदायित्वानां घोषणया हिमाचलप्रदेशे संस्कृतभाषायाः प्रचार-प्रसारकार्येषु नूतना गतिः भविष्यति इति आशा प्रकटिता। सर्वेषां नवनियुक्तदायित्वधारिणां कृते हार्दिक्यः शुभ-कामनाः प्रदत्ताः। तेषां नेतृत्वे संस्कृतभाषायाः संरक्षणे, संवर्धने तथा जनसामान्येषु संस्कृतस्य प्रचारकार्ये च नवोन्मेषः भविष्यति इति विश्वासः व्यक्तीकृतः। एषा अखिलभारतीयगोष्ठी संस्कृत-भाषायाः संवर्धनाय, भारतीयज्ञानपरम्परायाः संरक्षणाय, सङ्घटनात्मकैकतायाः सुदृढीकरणाय, संस्कृतकार्यस्य राष्ट्रव्यापिविस्ताराय महत्त्वपूर्णा आसीत्। उद्घाटनसमारोहात् समापनसत्रपर्यन्तं सम्पूर्णः कार्यक्रमः वैचारिकस्पष्टतायाः, सङ्घटनात्मकदृढतायाः, सांस्कृतिकनिष्ठायाः तथा सामूहिकसङ्कल्पस्य प्रेरणादायकः सन्देशं प्रदत्तवान्।

प्रेरकः प्रसंगः

आकाशात् पतितम् वृष्ट्याः बिन्दुः यदि हस्तोऽपरि वयं गृह्णीमः तर्हि सः पातुं योग्यम्। किन्तु सः प्रणाले पतति तर्हि तस्य प्रतिष्ठा विनष्टाः भवति तेन पादप्रक्षालनम् अपि कर्तुं न शक्यते। सः एव बिन्दुः उष्णे तप्तिके पतिता तर्हि तस्य अस्तित्वं नष्टं भवति। यदि पङ्कजोऽपरि अपतत् तर्हि सः मौक्तिकम् सादृशम् प्रकाश्यते। तथा च सः एव बिन्दुः शुक्तिकायाम् पतितम् तर्हि सः साक्षात मौक्तिकम् भविष्यति। बिन्दुः तथैव किन्तु कस्य साहचार्यम् सः प्राप्स्यते तस्योऽपरि बिन्दोः गौरवं, प्रतिष्ठा च लप्स्यते।

डॉ. वर्षा प्रकाश टोणगांवकर पुणे/





६३५ नूतन-गृहाणां सर्वेक्षणं स्वीकृतम्, गृहनिर्माणाय लप्स्यन्ते २.५० लक्षरूप्यकाणि

हिमसंस्कृतवार्ता — शिमला।हिमाचलप्रदेशस्य नगरीयक्षेत्रेषु निवसतां निर्धनानाम् आर्थिकरूपेण दुर्बलवर्गाणां च परिवाराणां स्वगृहनिर्माणस्य स्वप्नं साकारं विधातुं सर्वकारः आर्थिकसाहाय्यं प्रदास्यति। 'प्रधानमन्त्री-आवास-योजना-नगरीय २.०' (PMAY-U 2.0) इत्याख्यायाः योजनायाः अन्तर्गततया प्रदेशे ६३५ नूतनगृहाणां निर्माणाय सर्वेक्षणं कृतम् अस्ति। प्रदेशसर्वकारपक्षतः अधुना अन्तिमस्वीकृतये केन्द्रसर्वकारं प्रति इदं प्रेषयिष्यते। केन्द्रसर्वकारतः अनुमतौ सत्यां गृहनिर्माणार्थं राशिः स्वीकृता भविष्यति। एतानि गृहाणि 'लाभार्थि-आधारित-निर्माण-घटकस्य' (BLC) अन्तर्गततया स्वीकृतानि सन्ति। योजनानुसारं केन्द्रसर्वकारपक्षतः प्रतिगृहं २.२५ लक्षरूप्यकाणां तथा च प्रदेशसर्वकारपक्षतः २५ सहस्ररूप्यकाणाम् आर्थिकसाहाय्यं दास्यते। अनेन प्रकारेण योग्येभ्यः (पात्रेभ्यः) परिवारेभ्यः एकस्य गृहस्य निर्माणाय कुलम् २.५० लक्षरूप्यकाणां साहाय्यं लप्स्यते। 'प्रधानमन्त्री-आवास-योजना-नगरीय २.०' केन्द्रसर्वकारेण २०२४ तमस्य वर्षस्य सेप्टेम्बर्-मासस्य प्रथमात् दिनाङ्कात् पञ्चवर्षाणां कालावधये प्रवर्तिता वर्तते। अस्याः योजनायाः मुख्यम् उद्देश्यं नगरीयक्षेत्रेषु सर्वेभ्यः पात्रपरिवारेभ्यः सुलभाः आवासाः समुपलब्धाः कारयितुम् अस्ति। अस्यान्तर्गततया योग्यपरिवारेभ्यः गृहनिर्माणाय, क्रयणाय, भाटकेन वा आवासानां व्यवस्थापनार्थं केन्द्र-राज्यसर्वकाराभ्यां साहाय्यं प्रदीयते। इयं योजना राज्यैः, केन्द्रशासितप्रदेशैः, प्राथमिक-ऋण-संस्थाभिश्च माध्यमेन क्रियान्विता क्रियते।

हिमाचलप्रदेशे अस्याः योजनायाः अन्तर्गततया सर्वेषु नगरीय-स्थानिक-निकायेषु लाभार्थिनां सर्वेक्षणं विधीयते। अनेन सहैव जनेभ्यः योजनायाः परिज्ञापनाय सूचना-शिक्षा- सञ्चार-गतिविधयः (IEC) अपि सञ्चाल्यन्ते। राज्यस्तरीय-स्वीकृति-तथा-निरीक्षण-समित्याः उपवेशने बीएलसी-घटकस्य (BLC) अन्तर्गततया ६३५ नूतनगृहेभ्यः स्वीकृतिः प्रदत्ता। अस्य लाभः आर्थिकरूपेण दुर्बलवर्गस्य (EWS) योग्यपरिवारेभ्यः लप्स्यते। योजनान्तर्गततया गृहाणां स्वीकृत्या प्रदेशस्य नगरीयक्षेत्रेषु निवसताम् आर्थिकदुर्बलपरिवाराणां स्वगृहनिर्माणाय साहाय्यं भविष्यति। साम्प्रतं सर्वेषु नगरीयनिकायेषु सर्वेक्षणस्य जनचेतनायाश्च गतिविधयः प्रचलिताः सन्ति, येन योजनायाः योग्यानां लाभार्थिनाम् अभिज्ञानं कृत्वा तेभ्यः अस्याः लाभः दातुं शक्येत।

एतेषु मण्डलेषु स्वीकृतानि गृहाणि

मण्डलस्तरे प्रसारितायाः सूच्याः अनुसारेण बिलासपुर-मण्डलस्य स्वारघाटे १० गृहाणि, चम्बा-मण्डलस्य चम्बायां १२, चुवाड़ी-क्षेत्रे च ११ गृहाणि स्वीकृतानि सन्ति। हमीरपुर-मण्डलस्य बड़सर-क्षेत्रे २६, भोरञ्जे १५, हमीरपुरे ४८, नादौने १२, सुजानपुर-टीहरायां च १० गृहाणि स्वीकृतानि। काङ्गड़ा-मण्डले बैजनाथ-पपरोला-क्षेत्रे २९, देहरायां १०, धर्मशालायां ३२, नूरपुरे १०, पालम्पुरे ५४, शाहपुरे च १३ गृहाणां निर्माणाय स्वीकृतिः लब्धा। मण्डी-मण्डलस्य बलद्वाड़ा-क्षेत्रे ४२, धर्मपुरे १६, करसोगे २०, मण्ड्यां ४२, नेरचौके ११, सुन्दरनगरे च १३ गृहाणि स्वीकृतानि सन्ति। सिरमौर-मण्डलस्य नाहने १०, पावँटा-साहिबे १३, शिलाई-क्षेत्रे च १३ गृहाणि मञ्जूरीं प्राप्तानि। सोलन-मण्डलस्य नालागढे १५ गृहाणि स्वीकृतानि। ऊना-मण्डलस्य अम्बे ११, बङ्गाणायां १४, मैहतपुर-बसदेहड़ा-क्षेत्रे ११, सन्तोषगढे ११, टाहलीवाले १२ तथा च ऊना-नगरे सर्वाधिकानि ८९ गृहाणि निर्मातुं स्वीकृतिः प्रदत्ता वर्तते।

नवदेहल्यां हिमाचल-काङ्ग्रेस-दलस्य विशाल-प्रदर्शनम्, लक्ष्यम् अतिरिच्य समवेताः कार्यकर्तारः



हिमसंस्कृतवार्ता — नवदेहली।
'इण्डिया'-गठबन्धनस्य जनयात्रायां (जन-मार्च्) रामलीला-प्राङ्गणे सम्पन्नायां महाप्रदर्शन-सभायां रविवासरे मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः, उपमुख्यमन्त्री च सहिता समग्रः सर्वकारः सम्मिलितः अभवत्। अपरत्र दलस्य विधायकान्, निगम-मण्डलयोः अध्यक्षान् उपाध्यक्षान् च विहाय सङ्गठनस्य पदाधिकारिणः, विपुलायां संख्यायां कार्यकर्तारश्च स्वकीयाम् उपस्थितिम् अङ्कितां अकुर्वन्। 'मतं रक्षत-देशं रक्षत' (वोट बचाओ-देश बचाओ) इति जनसभायां हिमाचलात् समागतं जनसम्मर्दं वीक्ष्य नेतारः अपि अतीव प्रसन्नाः (गद्गदाः) सञ्जाताः। अत एव प्रदेश-काङ्ग्रेस-समित्या अपि अस्मिन् आयोजने हिमाचलात् कार्यकर्तृणां लक्ष्याद् अधिका जनमेदिनी समवेता इति विश्वासः कृतः। यत्किमपि स्यात्, रविवासरे 'इण्डिया'-गठबन्धनस्य जनयात्रायाः महाप्रदर्शनस्य अन्तराले नवदेहल्यां हिमाचलस्य शक्तिप्रदर्शनं सुस्पष्टं दृष्टम्।प्राप्तवार्तानुसारेण रविवासरे प्रातः एव 'हिमाचल-भवने' काङ्ग्रेस-नेतृणां कार्यकर्तृणां च सम्मर्दः प्रारब्धः जातः। अतः समग्रप्रदेशात् कार्यकर्तृषु हिमाचल-भवनं प्राप्तेषु सत्सु मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः, मन्त्रिमण्डलीय-मन्त्रिणः (कैबिनेट-मन्त्रिणः), विधायकाः, कार्यकर्तारश्च शोभायात्रायाः रूपेण रामलीला-प्राङ्गणं प्रति प्रातिष्ठन्त। अस्मिन् अन्तराले कार्यकर्तृभिः भाजपा-दलं केन्द्रीय-निर्वाचन-आयोगं च विरुद्ध्य भृशम् उच्चघोषः (नारेबाजी) विहितः। अस्मिन् अवसरे काङ्ग्रेस-दलस्य प्रदेशप्रकरणप्रभारिणी रजनी-पाटील-महोदया, उपमुख्यमन्त्री मुकेश-अग्निहोत्री, काङ्ग्रेस-प्रदेशाध्यक्षः विनय-कुमारः, सङ्गठनमहामन्त्री विनोद-जिण्टा च सहिताः मन्त्रिमण्डलीयमन्त्रिणः यत् रविवासरे देहल्याः मार्गेषु इतिहासः रचितः। सः पक्षम् अकरोत् यत् रामलीला-प्राङ्गणे आयोजितायां जनसभायां प्रदेशात् विंशतिसहस्राधिकाः (२०,०००+) कार्यकर्तारः सम्मिलिताः। सः अवदत् यत् लोकतन्त्रस्य रक्षणे जनहितस्य च सङ्ग्रामे हिमाचलस्य प्रत्येकः कार्यकर्ता सर्वमग्रे तिष्ठति।

बस्-यानस्योपरि आरूढः उपमुख्यमन्त्री, संवर्धितम् उत्साहबलम्

नवदेहल्यां जनसभायै सम्प्राप्तानां कार्यकर्तृणाम् उत्साहं संवर्धयितुम् उपमुख्यमन्त्री मुकेश-अग्निहोत्री बस्-यानस्य उपरितने भागे (छदि) आरूढवान्। विक्रमादित्य-सिंहः, रोहित-ठाकुरः, अनिरुद्ध-सिंहः, राजेश-धर्माणी तथा च विविधाः विधायकाः पदाधिकारिणश्च उपस्थिताः आसन्। महत्त्वपूर्णम् अस्ति यत् रविवासरे देहल्यां सम्पन्नायां जनसभायां प्रदेशतः दशसहस्रतः पञ्चदशसहस्रं (१०,०००–१५,०००) यावत् कार्यकर्तृणां सम्मिलनस्य लक्ष्यम् आसीत्। तथापि अस्मिन् आयोजने लक्ष्याद् अपि अधिकाः कार्यकर्तारः देहलीं सम्प्राप्ताः। ज्ञायते यत् 'एचआरटीसी' (HRTC)-बस्-यानैः व्यक्तिगत-बस्-यानैः च अतिरिच्य कार्यकर्तारः रेलयानेन अपि राजधानीं प्राप्नुवन्। अपरत्र प्रदेशस्य बहवः कार्यकर्तारः चण्डीगढ-नगरपर्यन्तं स्वकीयैः व्यक्तिगत-वाहनैः यात्रां विधाय ततः भाटक-कारयानैः (टैक्सी-माध्यमेन) हिमाचल-भवनं प्राप्ताः। प्रदेशस्य विविधभागेभ्यः समागताः कार्यकर्तारः पारम्परिक-वेशभूषायां दृष्टाः, तथैव पारम्परिक-वाद्ययन्त्राणां ध्वनिभिः अपि राजधानी प्रतिध्वनिता अभवत्। जनसभायाः समापनानन्तरं कार्यकर्तारः हिमाचलप्रदेशं प्रति परावृत्ताः। अपरत्र प्रदेश-काङ्ग्रेस-समित्याः सङ्गठनमहामन्त्रिणा विनोद-जिण्टा-महोदयेन स्वकीये सामाजिकमाध्यमपृष्ठे (Social Media) लिखितं

एलपीजी-वितरण-व्यवस्थायां महती वित्तीयानियमिततायाः भ्रष्टाचारस्य च आशङ्का!

त्रयाणां सार्वजनिकक्षेत्रस्य तैलकम्पनीनां बुकिङ्ग- वितरण- सॉफ्टवेयर- व्यवस्थायाः एकरूपनियन्त्रणस्य आग्रहः।

हिमसंस्कृतवार्ताः- वृजेश कुमार पाण्डेयः, नवदिल्ली। देशस्य एलपीजी (रन्धनगैस) वितरणव्यवस्थायां पारदर्शितां सुनिश्चित्य सम्भावितवित्तीयानियमिततां निवारयितुं एलपीजी वितरकसङ्घेन महत्त्वपूर्णा याचना उत्थापिता अस्ति।

सङ्घेन भारतसर्वकारस्य पेट्रोलियम-प्राकृतिकगैस- मन्त्रालयं प्रति आग्रहः कृतः यत् त्रयाणां सार्वजनिकक्षेत्रस्य तैलकम्पनीनां, गैस-आरक्षण- वितरणयोः सॉफ्टवेयर-व्यवस्था एकरूपा क्रियेत। अस्याः व्यवस्थायाः सञ्चालनं, नियन्त्रणं निरीक्षणं च प्रत्यक्षतया मन्त्रालयस्य अधीनं भवेत्।

वितरकैः सह वार्तालापे गम्भीराः प्रश्नाः समुत्थिताः

एलपीजी-वितरकैः सह कृते वार्तालापे आरोपाः समुत्थिताः यत् वाणिज्यिक-गैस-सिलिण्डराणां आपूर्तौ तैलकम्पनीभिः मूल्यरियायतस्य अथवा प्रोत्साहनराशेः नाम्ना पृथक्-पृथक् समझौताः क्रियन्ते। यदि एतादृशी व्यवस्था प्रचलिता अस्ति, तर्हि तया सर्वकारीयराजस्वस्य सम्बन्धिततैलनिगमानां च महती आर्थिकहानिः सम्भाव्यते। अत्र प्रमुखः प्रश्नः अस्ति यत् यदा घरेलू-एलपीजी-वितरणे विविधाः प्रतिबन्धाः नियन्त्रणव्यवस्थाश्च सन्ति, तदा वाणिज्यिक- एलपीजी-विक्रयस्य बिलनिर्माणे, मूल्यरियायतायां प्रोत्साहनराशिव्यवस्थायां च पारदर्शितायाः उत्तरदायित्वं कस्य अस्ति?

मन्त्रालयात् उत्तरदायित्व-निर्धारणस्य आग्रहः

सङ्घस्य मतम् अस्ति यत् त्रयाणां तैलकम्पनीनां पृथक् पृथक् सॉफ्टवेयर-व्यवस्थाभिः नियन्त्रणप्रणालीभिश्च वित्तीयव्यवहारस्य, अनुदानराशेः वितरणस्य, गैसवितरण- व्यवस्थायाः स्वतन्त्रं प्रभावी च निरीक्षणं बाधितं भवितुम् अर्हति। अतः सम्पूर्णायाः एलपीजी-वितरणव्यवस्थायाः अङ्कीयलेखापरीक्षणं कारयितुं, वाणिज्यिक-गैसस्य बिलनिर्माणे, मूल्यरियायतायां, प्रोत्साहनराशौ, सर्वकारीयानुदानस्य उपयोगे च निष्पक्षान्वेषणं कारयितुं मागः कृतः अस्ति।

किं पेट्रोलियममन्त्रालयः अस्यां दिशि आवश्यकं पदक्षेपं स्वीकरिष्यति?

अधुना सर्वेषां पुरतः प्रमुखः प्रश्नः अस्ति यत् पेट्रोलियममन्त्रालयः एलपीजी-वितरकसङ्घस्य अस्याः याचनायाः गाम्भीर्येण संज्ञानं स्वीकृत्य देशस्य एलपीजी-वितरणव्यवस्थायां पारदर्शितां, उत्तरदायित्वं च सुनिश्चितं करिष्यति वा? 'एकं राष्ट्रम्, एकं एलपीजी-सॉफ्टवेयर' इति व्यवस्था कदा कार्यान्विता भविष्यति? इति प्रतीक्षा अस्ति



उत्तरप्रदेशे नवीनं खाद्यसामग्रीपत्रम् निर्मातुं सप्तप्रपत्राणि आवश्यकानि

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊम्। उत्तरप्रदेशे नवीनं खाद्यसामग्रीपत्रम् निर्मातुम् इच्छुकानां परिवाराणां कृते राज्यसर्वकारेण आवश्यकप्रपत्राणां सूचना प्रसारिता अस्ति। खाद्यसामग्रीपत्रंनिर्माणार्थम् आवेदनं कर्तुं पूर्वं सर्वाणि आवश्यकानि प्रपत्राणि सज्जानि स्थापनीयानि सन्ति।

आवश्यकप्रपत्राणां सूची एषा अस्ति-

1. परिवारस्य महिला-मुख्यायाः आधारकार्डम्।
2. महिला-मुख्यायाः बैंक-पासपुस्तिका।
3. महिला-मुख्यायाः पासपोर्ट-आकारस्य छायाचित्रम्।
4. परिवारस्य कस्यचित् एकस्य सदस्यस्य चलदूरभाष-सङ्ख्या।
5. खाद्यसामग्रीपत्रे समावेशनीयानां सर्वेषां परिवारसदस्यानाम् आधारप्रपत्राणि।
6. परिवारस्य सर्वेषां सदस्यनामयुक्ता परिवार-पञ्जिकायाः प्रतिलिपिः।
7. परिवारमुख्यायाः आयप्रमाणपत्रम्।

वार्षिक-आयस्य निर्धारितसीमा

नवीनं खाद्यसामग्रीपत्रं निर्मातुं परिवारस्य वार्षिक- आयस्य सीमा क्षेत्रानुसारं निर्धारितास्ति।

१. ग्रामीणक्षेत्रम्-
परिवारस्य वार्षिकी आयः द्विलक्षरूप्यकात् न्यूना भवितव्या।

२. नगरीयक्षेत्रम्-
परिवारस्य वार्षिकी आयः त्रिलक्षरूप्यकात् न्यूना भवितव्या।

महत्त्वपूर्णा सूचना

आवेदनप्रक्रियायां काऽपि बाधा न भवेत्, अतः सर्वाणि आवश्यकप्रपत्राणि सम्यक् पूर्णरूपेण च सज्जानि स्थापनीयानि। आवेदनात् पूर्वं पात्रताप्रपत्राणां सम्बन्धे सम्बन्धितविभागात् आधिकारिकसूचनाम् अवश्यमेव अवगच्छन्तु। जनहिताय उत्तरप्रदेशसर्वकारस्य सूचना।

उत्तरप्रदेशस्य मुख्यमन्त्रिणा योगिना आदित्यनाथेन सह शिष्टाचारमेलनम्



गोरखपुर- फैजाबाद- खण्डशिक्षक- निर्वाचनक्षेत्रात् प्राप्त-जनविश्वासस्य दायित्वनिर्वहणाय प्राप्तम् अमूल्यं मार्गदर्शनम्।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ। गोरखपुर- फैजाबाद- खण्डशिक्षकनिर्वाचनक्षेत्रात् प्राप्तस्य जनविश्वासस्य, प्रदत्तस्य उत्तरदायित्वस्य अनन्तरम् उत्तरप्रदेशस्य माननीयमुख्यमन्त्रिणा परमपूज्येन योगी आदित्यनाथमहाराजेन सह शिष्टाचारमेलनं कृत्वा तस्य आत्मीयं सान्निध्यं, मङ्गलमयम् आशीर्वादं बहुमूल्यं मार्गदर्शनं च प्राप्तुं परमं सौभाग्यम् अवाप्तम्।

पूज्यमहाराजस्य आत्मीयः स्नेहः, उदात्ताः विचाराः, प्रेरणादायकानि आशीर्वचनानि मार्गदर्शकं सम्बोधनं च लोककल्याणाय, जनसेवायै तथा शिक्षकसमुदायस्य हितसंरक्षणाय समर्पितानां दायित्वानां निष्ठापूर्वकं निर्वहणाय सदैव नवीनाम् ऊर्जां, सम्बलं प्रेरणां च प्रदास्यन्ति।शिक्षायाः, शिक्षकसमाजस्य तथा व्यापकजनहितेन सम्बद्धानां विषयाणां प्रति संवेदनशीलतां, उत्तरदायित्वबोधं, जनकल्याणाय समर्पणभावं च अधिकं सुदृढीकर्तुं पूज्यमहाराजस्य मार्गदर्शनं सदैव प्रेरणाप्रदं भविष्यति। एतत् आत्मीयमेलनं न केवलं श्रद्धायाः सम्मानस्य च अविस्मरणीयः प्रसङ्गः आसीत्, अपि तु भविष्ये प्रदत्तानां दायित्वानां निष्ठापूर्वकं निर्वहणाय स्वप्रतिबद्धतां दृढीकर्तुम् अपि प्रेरणादायकः अवसरः अभवत्। परमपूज्याय महाराजश्रीयोगी आदित्यनाथाय हृदयस्य गहनतमा कृतज्ञता, अनन्या श्रद्धा सादरं प्रणामाश्च।

शिमला- सङ्कटमोचनमन्दिरात् रजतस्य त्रीणि किरीटानि सुवर्णस्य च नासाभरणं गृहीत्वा अपसृतः चौरः

हिमसंस्कृतवार्ता — शिमला।

हिमाचलप्रदेशस्य राजधान्याः शिमलायाः प्रसिद्धे श्रीसङ्कटमोचनमन्दिरे चौर्यस्य घटना प्रकाशिता जाता। कश्चन धूर्तः मन्दिरस्य गर्भगृहात् भगवतः रजतस्य (चांदी) त्रीणि किरीटानि (मुकुटानि) मातासीतायाश्च प्रायः एक-तोलक-परिमितं सुवर्णस्य नासाभरणं (नथ) चोरीकृत्य अपसृतवान्। एतदतिरिच्य मन्दिरे स्थापितात् दानपात्रात् नगदधनम् अपि चोरितम्। आरक्षिभिः (पुलिस-कर्मचारिभिः) अभियोगं पञ्जीकृत्य अन्वेषणं प्रारब्धम्।

सम्पूर्णानन्दसंस्कृतविश्वविद्यालये छत्तीसगढराज्य-स्थापनादिवसस्य भव्यः सांस्कृतिकमहोत्सवः सम्पन्नः





छत्तीसगढस्य लोकसंस्कृतेः जनजातीयपरम्पराणां च प्रदर्शनेन विश्वविद्यालयः सांस्कृतिकवैभवेन समलङ्कृतः; सतर्कतानां नागरिकाणां सुरक्षितराष्ट्रस्य च सन्देशः प्रसारितः।

हिमसंस्कृतवार्ताः उत्तरप्रदेशसंस्करणम्।

सम्पूर्णानन्द-संस्कृतविश्वविद्यालयस्यवाराणसीस्थस्य योगसाधनाकेन्द्रे रविवासरे कुलपतिः प्रो. बिहारीलालशर्मा इत्यस्य अध्यक्षतायां छत्तीसगढराज्यस्य स्थापनादिवसस्य उपलक्ष्ये भव्यः सांस्कृतिकमहोत्सवः आयोजितः। अस्मिन् अवसरे छत्तीसगढस्य समृद्धलोकसंस्कृतेः, जनजातीयपरम्पराणां, ऐतिहासिकवैभवस्य सांस्कृतिकविविधतायाश्च मनोहरं प्रदर्शनम् अभवत्। तेन सह सतर्कता- जागरूकतासप्ताह- २०२६ इत्यस्य अन्तर्गतं 'सतर्कः नागरिकः, सुरक्षितं राष्ट्रम्' तथा 'श्रेष्ठं समृद्धं भारतम्' इति विषययोः विशेषः जागरूकताकार्यक्रमः अपि आयोजितः। कार्यक्रमस्य शुभारम्भः वैदिक-पौराणिकमङ्गलाचरणेन, दीपप्रज्वालनेन तथा मातुः सरस्वत्याः प्रतिमायां माल्यार्पणेन च अभवत्। वैदिकमन्त्राणां पावनमङ्गलध्वनिना सम्पूर्णं वातावरणम् आध्यात्मिकया सांस्कृतिकया च गरिमया परिपूर्णम् अभवत्।

प्रत्येकस्य राज्यस्य भाषा-परम्परा-संस्कृतेः सम्मानः एव श्रेष्ठभारतस्य परिचायकः

अध्यक्षीयसम्बोधने कुलपतिः प्रो. बिहारीलालशर्मा अवदत् यत् भारतस्य वास्तविकं सामर्थ्यं तस्य सांस्कृतिकविविधतायां, समृद्धपरम्परासु, भाषासु तथा राष्ट्रियैकात्म्ये च निहितम् अस्ति। भारतस्य प्रत्येकस्य राज्यस्य भाषायाः, परम्परायाः, लोकाचारस्य, सामाजिकमान्यतानां तथा तत्रत्यजनानां सांस्कृतिकभावनानां सम्मानः अस्माकं सर्वेषां दायित्वम् अस्ति।

तेन उक्तं यत् कस्यचित् राज्यस्य गठनं केवलं भौगोलिकसीमानां निर्धारणं न भवति, अपि तु तस्य क्षेत्रस्य विशिष्टभौगोलिकपरिस्थितीनां, सामाजिकमान्यतानां, सांस्कृतिकचेतनायाः परम्पराणां च सम्मानपूर्वकं परिचयप्रदानस्य अवसरः भवति। छत्तीसगढराज्यस्य गठनमपि तत्रत्यायाः विशिष्टजनजातीयसंस्कृतेः, लोककलानां समृद्धपरम्पराणां च विकासस्य तथा राष्ट्रस्य विकासे तासां सहभागितायाः प्रतीकम् अस्ति।

राज्यस्थापनादिवसः तस्य प्रदेशस्य सांस्कृतिकास्मितायाः विशिष्टविरासतश्च सम्मानस्य अवसरः अस्ति। अस्माभिः देशस्य प्रत्येकस्य राज्यस्य संस्कृतीः परम्पराश्च आत्मसात्कृत्य पारस्परिकसद्भावस्य राष्ट्रियैकतायाश्च सूत्रं दृढतरं कर्तव्यम्। विभिन्नराज्यानां स्थापनादिवसमहोत्सवाः विद्यार्थिनः भारतस्य बहुआयामी- सांस्कृतिक-विरासतया परिचितान् कर्तुं सशक्तं माध्यमम् अस्ति। सर्वेषां सहभागितया, सम्मानेन समन्वयेन च मातृभूमेः गौरवध्वजः सदैव उन्नतः तिष्ठेत्। एषा एव 'एकं भारतम्, श्रेष्ठं भारतम्' इत्यस्य वास्तविकभावना, सशक्त- समृद्ध- गौरवशालि-राष्ट्रनिर्माणस्य आधारः इति तेन प्रतिपादितम्।

छत्तीसगढस्य लोकसंस्कृतेः लघुचलच्चित्रेण सांस्कृतिक-प्रस्तुतीनां च प्रदर्शनम्

कार्यक्रमस्य नोडलाधिकारी तथा छात्रकल्याणसङ्कायप्रमुखः प्रो. शैलेशकुमारमिश्रः स्वागतभाषणे आयोजनस्य रूपरेखां प्रस्तुतवान्। तेन छत्तीसगढस्य ऐतिहासिक- सामाजिक-भौगोलिक- सांस्कृतिकविशेषतासु प्रकाशः पातितः। विद्यार्थिनः तस्य राज्यस्य समृद्धविरासतया विशिष्टपरम्पराभिश्च परिचिताः कृताः।

अस्मिन्नवसरे छत्तीसगढस्य विकासयात्रायाः, जनजातीयसंस्कृतेः, लोकजीवनस्य ऐतिहासिक-विशेषतानां च आधारेण निर्मितस्य लघुचलच्चित्रस्य प्रदर्शनम् अभवत्। छत्तीसगढस्य लोकगीतानां सांस्कृतिकधुनानां च माध्यमेन तत्रत्याः लोकपरम्पराः जीवन्ततया प्रस्तुताः। विद्यार्थिभिः छत्तीसगढस्य सांस्कृतिकपरिचयविशेषताश्च आधृत्य भाषणानि, लोकगीतानि अन्याः सांस्कृतिक-प्रस्तुतयश्च प्रदर्शिताः। एताभिः प्रस्तुतिभिः विद्यार्थिनः स्वप्रतिभायाः प्रभावशालिनं प्रदर्शनं कृतवन्तः।

नैतिकता, ईमानदारी कर्तव्यनिष्ठा च श्रेष्ठसमृद्धभारतस्य आधारः

सतर्कताजागरूकतासप्ताह-२०२६ इत्यस्य अन्तर्गतं 'सतर्कः नागरिकः, सुरक्षितं राष्ट्रम्' तथा 'श्रेष्ठं समृद्धं भारतम्' इति विषययोः स्वविचारान् प्रस्तुतयन् विज्ञानविभागाध्यक्षः कुलानुशासकश्च प्रो. जितेन्द्रकुमारशाही अवदत् यत् राष्ट्रस्य समृद्धिः केवलम् आर्थिकविकासेन न, अपितु नागरिकाणां नैतिकचरित्रेण, ईमानदारितया कर्तव्यनिष्ठया च सुनिश्चितं भवति। प्रत्येकं नागरिकं भ्रष्टाचारस्य प्रति शून्यसहिष्णुतायाः भावनां धारयित्वा पारदर्शितां उत्तरदायित्वं च स्वाचरणस्य अभिन्नमङ्गं कर्तव्यम्। जागरूकाः नागरिकाः एव सुरक्षितराष्ट्रस्य आधारशिलाः सन्ति। युवापीढ्यां नैतिकमूल्यानां, सामाजिकदायित्वस्य राष्ट्रहित- भावनायाश्च विकासः श्रेष्ठसमृद्धभारतस्य निर्माणस्य मार्गं प्रशस्तं करिष्यति इति तेन प्रतिपादितम्।

उल्लेखनीयं यत् उत्तरप्रदेशस्य माननीय-राज्यपालस्य कुलाधिपतेश्च निर्देशानुसारं २०२६ तमस्य वर्षस्य अक्तूबर-मासस्य ३१ दिनाङ्कतः नवम्बर-मासस्य १५ दिनाङ्कपर्यन्तं विभिन्नप्रदेशानां स्थापनादिवसमहोत्सवाः आयोज्यन्ते। एतस्यैव क्रमस्य अन्तर्गतं विश्वविद्यालये आयोजितः छत्तीसगढराज्य- स्थापनादिवसमहोत्सवः सांस्कृतिकैकतायाः, राष्ट्रियसमरसतायाः विद्यार्थिनां रचनात्मकसहभागितायाश्च समर्पितः आसीत्।

कार्यक्रमस्य सञ्चालनं सह-नोडलाधिकारी डॉ. रवि-शङ्करपाण्डेयः कृतवान्। राष्ट्रगानेन कार्यक्रमस्य समापनम् अभवत्

अस्मिन्नवसरे कुलसचिवः श्री राकेशकुमारः, कुलानुशासकः प्रो. जितेन्द्रकुमारः, डॉ. उमाशङ्करउपाध्यायः, डॉ. श्रुतिउपाध्याया च सहितं विश्वविद्यालयस्य शिक्षकाः, अधिकारिणः, कर्मचारिणः बहुसङ्ख्याकाश्च विद्यार्थिनः उपस्थिताः आसन्।

"गुरु गौरव-सम्मानेन सम्मानितः संस्कृतज्ञः रविनन्दनकुमारझा"



हिमसंस्कृतवार्ता पटना। "द टीचर्स फ्यूचर मेकर्स बिहार" द्वारा सीनेट सभागारः, बिहार विश्वविद्यालयः, मुजफ्फरपुरे समायोजित- भव्यायोजने "संकल्प दिवसेन सह सम्मानसमारोहे आध्यक्षपदं निर्वहनार्थमाहूताः "प्रो (डा.) दिनेशचन्द्र-रायमहाशयाः कुलपतिवर्याः बिहारविश्वविद्यालयः मुजफ्फरपुरं", महान्तः गणितज्ञाः ख्यातिलब्धाः प्राक्तनकुलपतिचराः "प्रो. (डा.) के सी सिन्हा महाभागाः" सारणशिक्षक-विधानपार्षदः सच्चिदानंद रायवर्याः, बिहार सर्वकारस्य सीआईडी निदेशकपदमलंकुर्वाणाः डा. बी. के. चौधरीमहाभागस्य आतिथित्वेन विशिष्टातिथित्वेनोपस्थिताः तत्रैव समारोहेऽस्मिन् शिक्षणपद्धतौ नवाचाराय छात्राणां सारल्यावगमनाय सदा सर्वदा हितचिन्तकाय रविनन्दनझावर्याय गुरुगौरवसम्मानं प्राप्तम्। अनेन अन्येषां सर्वेषां शिक्षणकार्यसम्पादकानां छात्रहितचिन्तकानां प्रेरणा भविष्यति। येन शिक्षणे नवाचारद्वारा शिक्षणकार्यसम्पादनम् अधिकाधिकम् अभविष्यत्। अयम् केवलं पुरस्कारं नैव अपि तु सर्वकारिसेवायाम् इतोऽपि आधिक्यं श्रमं कर्तुं माम् सर्वथा माम् प्रेरयिष्यति। इति शम्

बलियायां पर्यावरण-लघु-रेल ६३१ धावकाः सोल्लासं भागं गृहीतवन्तः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, बलिया। बलियानगरे छात्रसहायतासमितिः, बलिया इत्यस्य तत्त्वावधाने आयोजिते पर्यावरण- मिनी- मैराथन-२०२६ इत्यस्य पुरस्कार- वितरण- सम्मान- समारोहे मुख्यातिथिरूपेण सहभागिता कृता। कार्यक्रमस्य शुभारम्भः जिलाधिकारिणा ज्ञानेन्द्रसिंहमहोदयेन दीपप्रज्वालनेन कृतः। पर्यावरणसंरक्षणस्य, युवाजनेषुसु क्रीडाभावनायाः, स्वस्थजीवनशैल्याः च संवर्धनम् उद्दिश्य आयोजितायाम् अस्यां मैराथन-प्रतियोगितायां ६३१ धावकाः धाविकाश्च अत्यन्तोत्साहेन सहभागितां कृतवन्तः।

राजकीय- उत्कृष्ट- वरिष्ठ- माध्यमिकविद्यालये 'मातृ-सरस्वतीमञ्चस्य' समर्पणम् उद्घाटनञ्च सम्पन्नम्



हिमसंस्कृतवार्ताः- कोटि धीमान, सिरमौरः राजकीय- उत्कृष्ट- वरिष्ठ- माध्यमिक-विद्यालये कोटि धीमान इत्यत्र एकः भव्यः गरिमामयश्च कार्यक्रमः आयोजितः अभवत्। अस्मिन् शुभावसरे परमपूज्याः श्रद्धेयाः श्री श्री १००८ महामण्डलेश्वराः स्वामी दयानन्दभारतीजीमहाराजाः मुख्यतिथिरूपेण उपस्थिताः आसन्। स्वामीजी महोदयेन विद्यालये नवनिर्मितस्य 'मातृ-सरस्वती-मञ्चस्य' (मां सरस्वती मंच) विधिवत् वैदिक-मन्त्रोच्चारणपूर्वकं लोकार्पणम् उद्घाटनञ्च कृतम्। कार्यक्रमस्य शुभारम्भे विद्यालयस्य यशस्विनः प्रधानाचार्याः परशुरामलोहियामहोदयाः प्रबन्धनसमित्या च सह मुख्यतिथीनां स्वामी दयानन्दभारतीजीमहाराजानां पुष्पगुच्छैः शाल-स्मृतिचिह्नादिभिः च भावभीनं स्वागताभिनन्दनं कृतवन्तः।तदनन्तरं स्वामीदयानन्दभारतीजीमहाराजाः छात्रान् सम्बोधितवन्तः। स्व-आशीर्वचनेषु तेन उक्तं यत् शिक्षायाः क्षेत्रे विद्यायाः देव्याः सरस्वत्याः स्थानं सर्वोपरि अस्ति। एषः मञ्चः छात्राणां प्रतिभाविकासार्थं सांस्कृतिक-चेतनायै च एकं नवं सोपानं सिद्धं भविष्यति। प्रधानाचार्यमहोदयः अपि मुख्यतिथीनां मार्गदर्शनार्थं कृतज्ञतां प्रकटितवान्। भविष्यति। अस्मिन् अवसरे विद्यालयस्य शिक्षकाः, कर्मचारिणः, छात्राः, स्थानीय- ग्रामीण-गण्यामान्याः नागरिकाः च बहुसंख्यायाम् उपस्थिताः आसन्। मञ्चस्य उद्घाटनेन समग्रे क्षेत्रे विद्यालये च हर्षोल्लासस्य वातावरणं वर्तते।



वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अद्य मया काश्चन विचित्राः वार्ताः सङ्गृहीताः। प्रथमा वार्ता चीनदेशात् अस्ति। तत्र एकस्मिन् विवाहे वरेण अन्तर्जालेन अज्ञाताः जनाः निमन्त्रिताः। तस्य परिवारजनाः न आगताः, अतः सः एकाकी जातः। परन्तु बहवः अज्ञाताः जनाः विवाहार्थं तत्र आगताः। तैः जनैः विलासमयानि 'मेबैक' मोटर-यानानि आनीतानि!

काव्या- नमस्ते नन्दिनि! अहो, सा तु अतीव आश्चर्यकरी वार्ता! अज्ञातानां जनानां साहाय्यम् उत्तमम्। तैः वराय महत् सुखं दत्तम्।

अन्या विचित्रा वार्ता अमेरिकादेशस्य टेनेसी-राज्यात् अस्ति। तत्र चत्वारः भल्लूकाः एकस्य यानस्य समीपं गताः। तैः भल्लूकैः यानात् भक्ष्याणि मद्यं च अपहृतानि। तैः तत्रैव मार्गे स्थित्वा तत् मद्यं पीतम्! यानस्य स्वामिना केवलं तत् दृष्टम्, सः भीतः जातः।

नन्दिनी- हह! भल्लूकैः मद्यं पीतम् इति अतीव हास्यजनकम्! तैः भक्ष्याणि अपि खादितानि!

तृतीया वार्ता कम्बोडियादेशात् अस्ति। एका विलासमयी महा-नौका तत्र गता। सा नौका आविश्वं गन्तुं सज्जालकैः निर्मिता। परन्तु धनस्य अभावात् सा मार्गे एव अवरुद्धा। सज्जालकैः द्विशतं यात्रिकाः मार्गे एव नौकायाः निष्कासिताः। तैः यात्रिकैः बहु-धनं दत्तम्, तथापि ते तत्र असहायाः जाताः।

काव्या- अहो कष्टकरम्! तैः यात्रिकैः महत् मूल्यं दत्तम्, तथापि तैः केवलं दुःखं प्राप्तम्।

अस्तु, अन्तिमा वार्ता आङ्ग्लदेशात् अस्ति। एकः नरः सम्पूर्णं विश्वम् पद्भ्याम् चलितः। अष्टाविंशति-वर्षाणि यावत् सः केवलं पद्भ्याम् गतः। तेन किमपि यन्त्रयानम् न प्रयुक्तम्। अन्ते इदानीं सः स्वदेशं प्रत्यागतः। तेन स्वीया दीर्घा यात्रा सफलतापूर्वकम् समाप्ता।

नन्दिनी- अहो, तस्य नरस्य धैर्यम् अद्भुतम्! अष्टाविंशतिवर्षाणि यावत् सः चलितः इति महते आश्चर्याय। अद्यतनः कार्यक्रमः अत्रैव समाप्तः। कृतज्ञताम् अर्पयामि तुभ्यम् काव्ये!



लेखकः- आचार्यः डॉ. रुरुकुमारमहापात्रः
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः

ब्रह्मवैवर्तपुराणस्य संक्षिप्तः कथापरिचयः

अष्टादशमहापुराणेषु ब्रह्मवैवर्तपुराणम् अन्यतमं महत्त्वपूर्णं भक्तिरसप्रधानं च पुराणम् अस्ति। अस्मिन् पुराणे परमात्मनः श्रीकृष्णस्य इच्छया प्रकृतेः सृष्टेश्च विकासस्य दिव्यं रहस्यं निरूपितमस्ति। अयं महाग्रन्थः मुख्यतया चतुर्षु खण्डेषु विभक्तोऽस्ति, येषु समग्रतया अष्टादशसहस्राणि (१८,०००) श्लोकाः सन्ति।

१. चतुर्णां खण्डानां कथासारः-

ब्रह्मखण्डः- अस्मिन् प्रथमखण्डे परमात्मनः श्रीकृष्णस्य स्वरूपं, गोलोकस्य महिमा, तथा ब्रह्मणा कृतायाः सृष्ट्युत्पत्तेः प्रक्रिया च वर्णितास्ति।

प्रकृतिखण्डः- अस्मिन् खण्डे प्रकृतेः पञ्चानां दिव्यरूपाणां (दुर्गा, राधा, लक्ष्मी, सरस्वती, सावित्री च) माहात्म्यं, तासां स्वरूपं पूजाविधानं च विस्तरेण निरूपितमस्ति।

गणेशखण्डः- अस्मिन् खण्डे विघ्नहर्तुः श्रीगणेशस्य जन्म, तस्य गजाननत्वस्य रहस्यं, तथा तस्य विविधाः दिव्यलीलाः वर्णिताः सन्ति।

श्रीकृष्णजन्मखण्डः- अयम् अस्य पुराणस्य विशालतमः, प्रमुखश्च खण्डोऽस्ति। अस्मिन् भगवतः श्रीकृष्णस्य पूर्णावतारस्य, राधाकृष्णयोः गोलोकलीलायाः विविधासु दिव्यलीलासु निहितस्य आध्यात्मिकतत्त्वस्य च रसमयं वर्णनं प्राप्यते।

२. राधातत्त्वस्य विशिष्टं निरूपणम्-

ब्रह्मवैवर्तपुराणस्य प्रमुखतमं वैशिष्ट्यम् इदमस्ति यत् अस्मिन् श्रीराधायाः स्वरूपं केवलं गोपीरूपेण न, अपि तु श्रीकृष्णस्य परमप्रियायाः, अभिन्नशक्तेः, सृष्टेः आद्याशक्तेश्च स्वरूपेण प्रतिष्ठापितमस्ति। गोलोके राधाकृष्णयोः दिव्यविवाहस्य, गोपीनां गोपानां च प्राकट्यस्य विविधाः कथाः भक्तानां हृदयानि भक्तिरसेन भावविभोराणि कुर्वन्ति। इदं पुराणं परवर्तिनां जयदेवादीनां महाकवीनां काव्यरचनासु प्रेरणास्रोतोभूतेषु अन्यतमम् अभवत्।

३. सांस्कृतिकं दार्शनिकं च महत्त्वम्-

अस्मिन् पुराणे केवलं पौराणिककथाः एव न सन्ति, अपितु आयुर्वेदसम्बद्धाः विषयाः, सदाचारस्य सिद्धान्ताः, दानस्य माहात्म्यं, तथा कर्मविपाकस्य अर्थात् कर्मफलस्य गहनं विवेचनमपि समुपलभ्यते। अयं ग्रन्थः वैष्णवभक्तिदर्शनस्य तथा संस्कृतगीतकाव्यपरम्परायाः विकासे महत्त्वपूर्णं स्थानम् आवहति।

गोलोकनाथस्य हरेश्चरित्रं
राधापदाम्भोजसुधारसार्द्रम्।
ब्रह्मवैवर्तपुराणं पवित्रं शृण्वन्ति ये ते हि
सुपुण्यवन्तः।।

भक्तिसाहित्यस्य, भक्तिरसपरम्परायाः, तथा संस्कृतकाव्यपरम्परायाः अनुसन्धानदृष्ट्या ब्रह्मवैवर्तपुराणम् एका अद्वितीया दिव्यमञ्जूषा वर्तते इति ॐ शम् ।ॐ।

चन्द्रबदनीपरिसरस्य प्राचार्यस्य डॉ. महन्थमौर्यस्य

सेवानिवृत्त्यवसरे भव्यः अभिनन्दनसौप्रास्थानिक-समारोहः सम्पन्नः



वार्ताहरः- डॉ. अभिषेक पाण्डेयः

नैखरी (टिहरीगढ़वालम्)। श्रीदेवसुमन-उत्तराखण्ड- विश्वविद्यालयस्य चन्द्रबदनी-परिसरस्य नैखरीस्थाने परिसर-निदेशकस्य प्राचार्यस्य च डॉ. महन्थमौर्यस्य सेवा-निवृत्त्युपलक्ष्ये परिसरपरिवार-तत्त्वावधानेन भव्यः भावपूर्णश्च अभिनन्दन-विदाई-समारोहः समायोजितः।

डॉ. महन्थमौर्यस्य जन्म 06 अक्टूबर 1961 तमे वर्षे उत्तरप्रदेशस्य आजमगढ़जनपदस्य देवग्रामस्थे कस्बानामके ग्रामे श्रीकरनराममौर्यस्य पुत्रत्वेन अभवत्। ज्ञाननिष्ठया, संस्कारसम्पन्नतया, अनवरतपरिश्रमेण, कर्मठतया च तेन शिक्षाजगति विशिष्टा प्रतिष्ठा समुपार्जिता। ज्ञानसेवयोः कर्तव्यपरायणतायाश्च कृते तेन स्वजीवनं समर्पितम्। 'कर्म एव पूजा, सेवा एव जीवनम्, समर्पणमेव च वास्तविकसाफल्यस्य आधारः' इति जीवनादर्शान् हृदये निधाय तेन स्वजीवनं सार्थकतया समलङ्कृतम्। अस्मिन् गौरवपूर्णे समारोहे तस्य धर्मपत्नी श्रीमती परमीला देवी तथा पुत्रः प्रवीणश्च सगौरवम् उपस्थितौ आस्ताम्।तस्य सेवायात्रा 1993 तमे वर्षे वाराणसीस्थे राजघाटस्थिते गान्धीविद्यासंस्थाने अनुसन्धाना-धिकारिरूपेण प्रारब्धा, यत्र सः 1999 तमं वर्षं यावत् सेवाम् अकरोत्। अनन्तरं 17 जनवरी 2000 तमे दिने पौड़ीगढ़वाले चौबट्टाखालस्थे राजकीयमहाविद्यालये भूगोलविषयस्य प्रवक्तृपदे कार्यभारं स्वीकृत्य उत्तराखण्डस्य उच्चशिक्षाक्षेत्रे राजकीयसेवायाः शुभारम्भम् अकरोत्। 2012 तमे वर्षे सह-आचार्यपदं प्राप्तवान्। ततः 24 सितम्बर 2017 तमे वर्षे कोटद्वारस्थे राजकीयस्नातकोत्तरमहाविद्यालये कार्यभारं स्वीकृतवान्। अनन्तरं 17 नवम्बर 2022 तमे वर्षे टिहरीगढ़वालस्य नैखरीस्थे राजकीयमहाविद्यालये चन्द्रबदनीपरिसरे प्राचार्यपदस्य दायित्वं स्वीकृत्य संस्थायाः शैक्षणिक-प्रशासनिक-संस्थागत-विकासाय नूतनां दिशं गतिं च प्रदत्तवान्।तस्य सम्पूर्णः सेवाकालः शैक्षणिकगुणवत्तायाः संवर्धने, अनुशासनस्य संस्थापने, विद्यार्थिनां सर्वाङ्गीणविकासे, संस्थागतप्रगतेः च कृते समर्पणस्य प्रेरणादायकम् उदाहरणम् अस्ति। शैक्षणिकानुभवेन आधुनिकप्रौद्योगिकीज्ञानेन च समन्वितं तस्य व्यक्तित्वं समर्पितशिक्षकस्य, कुशलप्रशासकस्य, दूरदर्शिनः शिक्षाविदः, कर्मयोगिनश्च आदर्शरूपेण प्रतिष्ठितम्। शिक्षायाः मूलोद्देश्यं विद्यार्थिनां सर्वाङ्गीणविकासं च तेन स्वकीयकार्यशैल्या चरितार्थीकृतम्।

समारोहस्य शुभारम्भः मुख्यातिथिना डॉ. महन्थमौर्येण, प्रभारीप्राचार्येण डॉ. मूलचन्द्रशुक्लेन तथा अन्यैः गणमान्यैरतिथिभिश्च संयुक्तरूपेण मातुः सरस्वत्याः समक्षं दीपप्रज्वालनेन कृतः।अस्मिन् अवसरे उपस्थितैः समस्तप्राध्यापकैः कर्मचारिभिश्च डॉ. मौर्यस्य दीर्घकालीनशैक्षणिकसेवायाः स्मरणं कृत्वा तस्य शैक्षणिकयोगदानस्य, कार्यकौशलस्य, प्रशासनिकदक्षतायाः, संस्थानं प्रति समर्पणभावस्य च मुक्तकण्ठेन प्रशंसा कृता।प्रभारीप्राचार्येण डॉ. मूलचन्द्रशुक्लेन संस्कृत-हिन्दीभाषयोः विरचितेन प्रशस्तिपत्रेण, शालया, सम्मानोपहारेण च तस्य सादरम् अभिनन्दनं कृतम्। तेन डॉ. मौर्यस्य व्यक्तित्वस्य कृतित्वस्य च प्रशंसां कुर्वता तस्य स्वस्थं, सुखमयं, शान्तिपूर्णं, मङ्गलमयं च सेवानिवृत्तजीवनं कामितम्। अन्ते अनेन धन्यवादज्ञापनमपि प्रस्तुतम्। तस्य सहकारिभिः सहकार्यकाले अनुभूताः आत्मीयाः स्मृतयः, अनुभवाश्च समुपस्थापिताः। सर्वैः तस्य भाविजीवनस्य कृते हार्दिक्यः शुभकामनाः समर्पिताः। डॉ. मौर्यस्य 26 वर्षाणां राजकीयसेवायात्रा तस्य कर्मनिष्ठायाः, समर्पणस्य, शैक्षणिकप्रतिबद्धतायाश्च परिचायिका वर्तते।समारोहस्य अन्तिमे चरणे प्रभारीप्राचार्यः डॉ. मूलचन्द्रशुक्लः, डॉ. गुरुप्रसादथपलियालः, अनुपा फोनिया, डॉ. शाकिरशाहः, पंकजपुण्डीरः, वन्दनासिंहः, सुरेशभट्टः, स्टाफक्लबसचिवः वेदनिधिगोनियालः, कोषाध्यक्षः पूजासैलानी, मुख्यप्रशासनिकाधिकारी मुकेश प्रसाद रतूड़ी, विजयबागड़ी, भुवनेशविष्टः इत्यादिभिः परिसरपरिवारस्य सदस्यैश्च प्रशस्तिपत्रं, सम्मानोपहारं, विविधोपहारांश्च प्रदाय डॉ. महन्थमौर्याय भावपूर्णा विदाई प्रदत्ता।

कार्यक्रमस्य कुशलं सञ्चालनम् अरविन्दराणामहोदयेन मोहित-उप्रेतीमहोदयेन च संयुक्तरूपेण विहितम्।

अस्मिन् समारोहे सौम्या कबटियाल, प्रदीपचौधरी, पूनमगैरोला, डॉ. आशुतोषजंगवाणः, डॉ. सरिता, योगप्रशिक्षिका सरोज, दिनेशः पुण्डीरः, उत्तमः, अजयलिंगवालः, अखिलेशः, सुनीलः, संजना, लक्ष्मी, राजेश्वरी,अनुजः इत्यादयः समस्तपरिसरपरिवारस्य सदस्याः उपस्थिता आसन्। डॉ. महन्थमौर्यस्य सेवानिवृत्तिजीवनमपि ज्ञानानुभवाभ्यां, आत्मिकशान्त्या, सृजनात्मक-चिन्तनेन, सामाजिकसक्रियतया च परिपूर्णं भवतु इति परिसरपरिवारस्य हार्दिकी मङ्गलकामना आसीत्।

डीपीएस बोकारो-विद्यालये द्विदिवसीयस्य ‘अग्रणी एम.यू.एन. 2.0’-सम्मेलनस्य भव्यः समापनसमारोहः, तृतीयसंस्करणस्य आयोजनस्य संकल्पेन स्थापितः नवीनः आदर्शः



पूर्वभारतस्य विभिन्नप्रदेशेभ्यः समागतानां प्रायः २५० प्रतिनिधीनां महती सहभागिता

हिमसंस्कृतवार्ताः- सौरभः दे, बोकारो।

डीपीएस् बोकारो-विद्यालये आयोजितस्य ‘अग्रणी एम्.यू.एन्. 2.0’ इति द्विदिवसीयस्य भव्यस्य अन्तर्राष्ट्रीयप्रतिरूपसंसदः समापनसमारोहः अत्यन्तम् उत्साहपूर्णेन समृद्धिदायकेन च वातावरणेन सम्पन्नः। युवजनानां बौद्धिकप्रतिभायाः, चिन्तनकौशलस्य, वैश्विकदृष्टिकोणस्य च उत्कृष्टं प्रदर्शनम् अस्य सम्मेलनस्य प्रमुखमाकर्षणम् आसीत्। झारखण्डराज्यस्य, समीपवर्तिराज्यानां प्रतिष्ठितेभ्यः शिक्षासंस्थानेभ्यः च समागतानां प्रायः २५० प्रतिनिधीनां सहभागितया विविधेषु समितिषु समसामयिकवैश्विकविषयेषु गम्भीरः विचारविमर्शः कृतः। एतत् सम्मेलनं युवानां कृते ज्ञानवर्धनस्य, नेतृत्वक्षमताविकासस्य तथा वैश्विकविषयाणां सम्यगवगमनस्य उत्कृष्टं मञ्चम् अभवत्।सम्मेलने संयुक्तराष्ट्रसङ्घस्य मानवाधिकारपरिषत्, लोकसभा, इण्डियन प्रीमियर लीग, महानीलामी, अन्तर्राष्ट्रीयपत्रकारिता, महिलास्थितिविषयकं संयुक्तराष्ट्रसङ्घीयम् आयोगम् इत्येतासु समितिषु च कार्यवाही समायोजिता। युवाप्रतिनिधयः आत्मविश्वासेन स्वस्वविचारान् प्रस्तुतवन्तः तथा विविधेषु वैश्विकविषयेषु जिज्ञासां बौद्धिकक्षमतां च प्रदर्शितवन्तः। तेषां प्रस्तुतयः सर्वेषां प्रशंसाम् आकर्षितवत्यः। राँचीस्थस्य बी.आई.टी. मेसरा-संस्थानस्य अनुभवीभिः एम.यू.एन. कार्यकारिणीमण्डलस्य सदस्यैः प्रतिनिधीनां विशेषं मार्गदर्शनं प्रशिक्षणं च कृतम्।

विविधासु समितिषु उत्कृष्टप्रदर्शनं कृतवद्भ्यः प्रतिनिधिभ्यः विभिन्नेषु पुरस्कारवर्गेषु सम्मानानि प्रदत्तानि। संयुक्तराष्ट्रसङ्घस्य सुरक्षा-परिषदि सर्वश्रेष्ठप्रतिनिधेः पुरस्कारः डीपीएस् बोकारो-विद्यालयस्य दिविशा वत्स इत्यस्यै प्रदत्तः। उच्चप्रशंसापुरस्कारः डीपीएस् धनबाद-विद्यालयस्य ईशानकुमाराय इत्यस्मै, विशेषप्रशंसापुरस्कारः चिन्मयविद्यालयस्य प्रियंशुपाण्डेय इत्यस्मै च प्रदत्तः। मौखिकप्रशंसापुरस्कारं शुभजीतपाल (ए.जी.सी.एस., पुरुलिया), अनन्यासिंह (पिट्स मॉडर्न, गोमिया), अनीमेशकुमारः तथा तेजसपाठकः (डीपीएस बोकारो) प्राप्तवन्तः।संयुक्तराष्ट्रसङ्घस्य महिलास्थितिविषयक-आयोगे सर्वश्रेष्ठप्रतिनिधेः पुरस्कारः डीपीएस् चास-विद्यालयस्य सक्षमसिंहाय प्रदत्तः। उच्चप्रशंसापुरस्कारं डीपीएस बोकारो-विद्यालयस्य शाम्भवी प्राप्तवती। विशेषप्रशंसापुरस्कारः डीपीएस् धनबाद-विद्यालयस्य प्रज्ञाकुमारी इत्यस्यै प्रदत्तः। मौखिकप्रशंसापुरस्कारं सुवर्ण अग्रवाल (डीपीएस् बोकारो), श्रेष्ठा चटर्जी तथा सायन्तिका खान (ए.जी.सी.एस.) प्राप्तवत्यः। लोकसभासमितौ सर्वश्रेष्ठप्रतिनिधेः पुरस्कारः चिन्मयविद्यालयस्य मन्नतछाबरा इत्यस्यै प्रदत्तः। उच्चप्रशंसापुरस्कारं डीपीएस् बोकारो-विद्यालयस्य ख्यातिरञ्जनः तथा डीपीएस चास-विद्यालयस्य आलोकशर्मा प्राप्तवन्तौ। विशेषप्रशंसापुरस्कारं डीपीएस बोकारो-विद्यालयस्य सृष्टिमिश्रा तथा सेण्ट् जेवियर्स-विद्यालयस्य सान्वी सुमन प्राप्तवत्यौ। मौखिकप्रशंसापुरस्कारं डीपीएस बोकारो- विद्यालयस्य नितेशकुमारः, कुमारी दिव्यदर्शिनी, बोकारो पब्लिक विद्यालयस्य कनिष्का प्रिया प्राप्तवत्यः।आइ.पी.एल. समितौ सर्वश्रेष्ठप्रतिनिधेः पुरस्कारः बोकारोस्थितस्य श्रीअय्यप्पा पब्लिक विद्यालयस्य दीपेशकुमाराय प्रदत्तः। उच्चप्रशंसापुरस्कारं डीपीएस बोकारो-विद्यालयस्य श्रेयांशसिंहगौतमः प्राप्तवान्। विशेषप्रशंसापुरस्कारः डीपीएस बोकारो-विद्यालयस्य साहिलकेशरी इत्यस्मै प्रदत्तः। सर्वश्रेष्ठदलस्य पुरस्कारः ‘गुजरात टाइटन्स’ इति दलाय प्राप्तः। अस्मिन् दले डीपीएस बोकारो- विद्यालयस्य हर्षसोमानी, वर्षिकेराज तथा सक्षमअग्रवाल इत्येते सदस्याः आसन्।अन्तर्राष्ट्रीयपत्रकारितासमितौ चित्रव्यङ्ग्य-चित्रकारवर्गे विशेषप्रशंसापुरस्कारः डीपीएस् चास-विद्यालयस्य अमनमाहतो इत्यस्मै, छायाचित्रकारवर्गे विशेषप्रशंसापुरस्कारः डीपीएस राँची-विद्यालयस्य सिद्धिकासिंहा इत्यस्यै, वार्ताहरवर्गे विशेषप्रशंसापुरस्कारः डीपीएस बोकारो- विद्यालयस्य ईशान्तकुमारसाव इत्यस्मै प्रदत्तः। सर्वश्रेष्ठचित्र-व्यङ्ग्यचित्रकारस्य पुरस्कारं पिट्स् मॉडर्न स्कूल, गोमिया-विद्यालयस्य अरमानप्रेम प्राप्तवान्। सर्वश्रेष्ठछायाचित्रकारस्य पुरस्कारं डीपीएस धनबाद-विद्यालयस्य समृद्धिप्रधान प्राप्तवती। सर्वश्रेष्ठवार्ताहरस्य पुरस्कारं पिट्स् मॉडर्न स्कूल, गोमिया-विद्यालयस्य नन्दिनीसिंहा प्राप्तवती। समग्रतः सर्वश्रेष्ठप्रतिनिधिमण्डलस्य पुरस्कारः दिल्ली पब्लिक स्कूल, बोकारो- विद्यालयेन प्राप्तः।विद्यालयस्य प्राचार्यः डॉ. ए. एस. गङ्गवारः पुरस्कारविजेतॄन् तथा ‘अग्रणी एम.यू.एन. 2.0’ सम्मेलनस्य अभूतपूर्वसाफल्ये योगदानं दत्तवद्भ्यः डीपीएस् बोकारो-विद्यालयस्य समग्रं दलं हार्दिकम् अभिनन्दितवान्। सः बी.आई.टी. मेसरा, राँची-संस्थानात् समागतानां कार्यकारिणीमण्डलस्य सदस्याणां प्रति विशेषं कृतज्ञतां प्रकटितवान्।सः अवदत् यत् ‘अग्रणी एम्.यू.एन्. 1.0’ इत्यस्मात् ‘अग्रणी एम.यू.एन. 3.0’ पर्यन्तं प्रचलितः अयं प्रवासः केवलम् अन्यस्याः उपलब्धेः प्राप्तिः नास्ति, अपि तु जागरूकानां, उत्तरदायिनां, भविष्यस्य नेतृत्वकर्तॄणां निर्माणार्थं पोषितस्य प्रियस्वप्नस्य साकाररूपेण परिणमनम् अस्ति। यत् कदाचित् स्वप्नरूपेण आरब्धम्, तत् अद्य युवजनानां विचाराणां कल्पनानां च अभिव्यक्तये शक्तिशाली मञ्चरूपेण विकसितम्। अतः ‘अग्रणी’ केवलम् एकः उपक्रमः नास्ति, यः प्रत्येकं संस्करणेन सह विकासं प्राप्नोति, अपितु डीपीएस बोकारो-विद्यालयस्य समर्पितदलेन पूर्यमाणः एकः दृढः सङ्कल्पः अपि अस्ति।

साहित्यलोकस्य मासिकं रचनागोष्ठी- समायोजनम्।

‘विकासोन्मुखं श्रेयः, विनाशोन्मुखं न श्रेयः...’

हिमसंस्कृतवार्ताः- बोकारो। प्रख्यातायाः साहित्यिकसंस्थायाः ‘साहित्यलोक’-स्य मासिकी रचनागोष्ठी शनिवासरे सायंकाले वरिष्ठसाहित्यकारस्य बुद्धिनाथझा-महोदयस्य चीराचासस्थिते निवासस्थाने समायोजिता। वरिष्ठसाहित्यकारस्य सुखनन्दनसिंह ‘सदय’ महोदयस्य अध्यक्षतायां, साहित्यलोकस्य संयोजकस्य अमनकुमारझा-महोदयस्य सञ्चालने च आयोजितायामस्यां गोष्ठ्यां साहित्यकाराः सामाजिकसरोकारान्, पर्वोत्सवान्, हास्यव्यङ्ग्यं, प्रेमभावनां मानवीयसंवेदनाश्च आधृत्य विविधाः रचनाः प्रस्तुत्य स्वकीयां सृजनात्मकप्रतिभां प्रदर्शितवन्तः। गोष्ठ्याः प्रारम्भः हिमांशुशेखरझा- महोदयेन आराध्याझा-महोदयया च प्रस्तुतस्य शान्तिपाठस्य माध्यमेन अभवत्।कवयित्री शैलजाझा ‘बाट जोहती रही’ इति हिन्दीभाषायां, ‘समुद्रक भेंट’ इति मैथिलीभाषायां च स्वकीये काव्ये प्रस्तुतवती। धनञ्जयकुमारदासः ‘समय सं पैघ लड़ाई’ तथा ‘हमर प्रसन्नताक राज’ इति रचनाद्वयं प्रस्तुतवान्। अमृताशर्मा ‘पौ बारह शकुनियों के’ तथा ‘अब ओ प्यारा गांव कहां है’ इति कविताद्वयं श्रावितवती। अमनकुमारझा ‘टीक रखनिहार बाबा’ इत्यस्य द्वितीयं खण्डं प्रस्तुतवान्। नीलमझा ‘कर्मवीर कौन है यहां’ इति हिन्दीकवितां तथा ‘कोजगरा पावनि महान्’ इति मैथिली-कवितां प्रस्तुतवती।विजयशङ्करमल्लिक ‘सुधापति’ महोदयः ‘विकासोन्मुखं श्रेयः, विनाशोन्मुखं न श्रेयः’ तथा ‘चलू नशापानं निर्मूलं कुर्मः’ इति मैथिलीभाषायां रचिते कविते प्रस्तुतवान्। डॉ. रणजीतकुमारझा ‘संस्कृतच्छन्दांसि’ तथा ‘कोन ज़माना आयल विकट’ इति रचनाद्वयं श्रावितवान्। बुद्धिनाथझा ‘जय जय श्रीनन्दलाल’ इति भक्तिरसपूर्णां रचनां प्रस्तुतवान्। अध्यक्षः सुखनन्दनसिंह ‘सदय’ महोदयः मैथिलीमहाकाव्यस्य ‘ऊँ महाभारत’ इत्यस्य रचयितुः महान् कवि बुद्धिनाथझामहोदयस्य व्यक्तित्वं प्रकाशयन्तीं ‘शब्दसुमन’ इति कवितां तथा ‘हे अनल’ इति रचनां श्रावयित्वा सर्वेषां प्रशंसाम् अलभत।

प्रस्तुतासु रचनासु समीक्षात्मकाः टिप्पण्यः सुधापतिमहोदयेन, सदयमहोदयेन, बुद्धिनाथझा महोदयेन, शम्भुझा महोदयेन, शैलजाझा महोदयया, सञ्जयझामहोदयेन च प्रदत्ताः। गोष्ठी साहित्यिकचिन्तनस्य, सृजनात्मकाभिव्यक्तेः तथा परस्परविचारविनिमयस्य सुन्दरं माध्यमम् अभवत्।